वज्रमिथः संसक्तत्रिषष्ट्यकाकारं दीर्घकल्पम् । सांतं हं षां तेन सेनयुतं भुवनस्वरेण अँ वासं युतं नादविन्दुकलार्द्धचन्द्रेणाक्रान्तं विसर्गसहितं समालिखेत् । पृथ्वीबीजं लँ, मध्यबीजस्य हलौंदित्यस्य पार्श्वतो दक्षिणवामयोः, सां तं हं शांतमनुस्वारां तं, षां तं च विसर्गयुक्तमित्यन्वयः किं कृत्वा सां तं षां तं लिखेदित्याकाक्षायां स्वरंश्चोक्त्वेति न तु व्यञ्जनभावनेत्यर्थः । षां तं सं त्रयोदशेन अवा सहितं सां तं हमनुस्वारसहितम् । मातृकावर्णैरादिलक्षांतैः । व्योमहं शक्त्या सेनसहितं भुवनस्वरेणाबाभूषितमिदं सविसर्गनादविन्दु-कलाक्रान्तं मध्यगतं वीजैः पृथ्वी पृथ्वीवीजैर्मातृकासंख्याकैः संवेष्ट्-योपरि व्योमाकारं यथाभवति तथा कुर्यादित्यर्थः लिखनं पठितं ब्रूमे रोरेवेति तथोक्तं, प्राणान् भूचक्रस्य, मूलमभीष्टयन्त्रदेवताकं मन्त्रम् ॥ २५–३२ ॥

भूचक्रं तु मया प्रोक्तं लिपिचक्रं शृणु प्रिये ! ।
वाय्वग्निभूजलाकाशवर्णान्सम्यग्विभावयेत् ॥ ३३ ॥
अकारश्च तथाकार एकारोऽथककारकः ।
चकारश्च टकारश्च तकारश्च पकारकः ॥ ३४ ॥
यकारश्च षकारश्च वायुवर्णाः समीरिताः ।
इकारेकारवर्णस्तु ऐकारश्चखवर्णकः ॥ ३५ ॥
छकारस्तु ठकारोऽथ थकारः फार्णकः स्मृतः ।
रकारश्च क्षकारश्च अग्निवर्णा इमे प्रिये ॥ ३६ ॥
उकारोकारवर्णौ च ओकारोथ गवर्णकः ।
जकारश्च डकारश्च दकारोथ बकारकः ॥ ३७ ॥
लकारश्च लकारश्च भूमिवर्णाः उदाहृताः ।
ऋकारोथ ॠकारश्च औकारोथ घवर्णकः ॥ ३८ ॥
झकारश्च ढकारश्च धकारश्च ततः परम् ।
भकारोथ वकारश्च सकारश्च जलार्णकाः ॥ ३९ ॥
ऌकारश्च ॡकारश्च अंकारस्तदनन्तरम् ।
ङकारोथ ञकारश्च णकारः परतः स्मृतः ॥ ४० ॥
नकारोथ मकारश्च शकारश्च हकारकः ।
एते वर्णा नियत्संख्याः क्रमेण परिकीर्त्तिताः ॥ ४१ ॥
पृथ्वीवर्णाः शान्तिके तु जलवर्णास्तु मोहने ।
विद्वेषे च तथोच्चाटे वह्निवर्णाः प्रकीर्त्तिताः ॥ ४२ ॥
वश्ये तु वर्णा वायोः स्युर्नाभसाः सर्वकर्मसु ।
मारणे ताडने स्तंभने शत्रुनाशनके परे ॥ ४३ ॥
शाकिनी डाकिनीभूतप्रेतवेतालजेपि च ।
महामारीप्रशमने महोत्पातप्रशान्तये ॥ ४४ ॥
वह्निवर्णान्समाहृत्य लिखेद्यन्त्रपरायणः ।
लिपिवर्णाः समाख्याता यथावत्प्राणवल्लभे ! ॥ ४५ ॥

---

भूचक्रमिवावश्यकत्वाल्लिपिचक्रमिदं तु कार्यविशेषे एककोष्ठ-वर्णप्रयोजकम् ॥ ३३–४१ ॥

भूचक्रन्यासः लिपिचक्रन्यासः

शत्रुनाशनके परे श्रेष्ठे कर्मणि, यस्य ॥ ४२ ॥
नाशे सति लोकः सुखं विन्दतीत्यर्थः ॥ ४३ ॥
वेतालज इत्यनन्तरं भये इति शेषः ॥ ४४–४५ ॥

इदानीं शृणु देवेशि ! प्रयोगानुक्रमेण तु ।
शान्तिवश्यस्तंभनादि विद्वेषोच्चाटने तथा ।
मारणं रसकर्माणि तानि वक्ष्याम्यशेषतः ॥ ४६ ॥
रोगकृत्या ग्रहादीनां निराः शान्तिरीरिता ।
वश्यं जनानां सर्वेषां विधेयत्वमुदाहृतम् ॥ ४७ ॥
प्रत्यक्षरोधः सर्वेषां स्तम्भनं समुदाहृतम् ।
स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतम् ॥ ४८ ॥
उच्चाटनं स्वदेशादेर्भ्रंशनं समुदाहृतम् ।
सर्वेषां प्राणहरण मारणं परिकीर्त्तितम् ॥ ४९ ॥
रतिर्वाणी रमाज्ययेष्ठा दुर्गाकाली यथाक्रमात् ।
षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत् ।
ईशचन्द्रेन्द्रनिर्ऋतिवाखग्नीनां दिशो मताः ॥ ५० ॥
सूर्योदयं समारभ्य भटिकादशकक्रमात् ।
ऋतवः स्युर्वसन्ताद्या अहोरात्रं दिने दिने ।
वसन्तग्रीष्मवर्षाख्य शरद्धैमन्तशैशिराः ॥ ५१ ॥
हेमन्ते शान्तिकं कर्म कर्त्तव्यं समुदाहृतम् ।
वश्ये वसन्तनामातु सर्वकार्याणि साधयेत् ॥ ५२ ॥
शिशिरे स्तम्भनं प्रोक्तं पूर्वाचार्यैर्विचक्षणैः ।
ग्रीष्मे विद्वेषणं प्रोक्तं कर्त्तव्यं देशिकोत्तमैः ॥ ५३ ॥
वर्षा तूच्चाटने प्रोक्ता निश्चयेन मनीषिभिः ।
मारणे तु शरद्ज्ञेया सर्वेषां हि मतं त्विदम् ॥ ५४ ॥

---

रसकर्माणि षट्कर्माणीत्यर्थः ॥ ४६ ॥

निराशो विध्वंसनम्, विधेयत्वं स्वाधीनत्वम् ॥ ४७ ॥

प्रत्यक्षाविरोधः सत्यपि ज्ञाने कर्तव्यानुत्पादको व्यापारः । मिथः स्निग्धानां परस्परं प्रीतिभाजाम् ॥ ४८ ॥

स्वदेशादेः साधकाभिप्रेतदेशग्रामगृहक्षेत्रादेः सकाशात् । प्राणहरणं येषां नाशे लोकः सुखं स्वपतिस्वधर्मानुष्ठानपरतया तेषामेव ॥ ४९ ॥

षट्कर्म देवतापूजनं चोक्तनाममन्त्रेण कार्यम् । यथा ऊँ रं रत्यै नम इत्यादि । ईशादीनां दिशः षट्कर्मकर्त्रभिमुखा मता. ईशदिक् ऐशानी चन्द्रदिक उत्तरा इन्द्रदिक पूर्वा ॥ ५०–५१ ॥

सर्वकार्याणि शान्त्यादीनि ॥ ५२–५४ ॥

त्रिवर्षाद्वित्सराद्वापि षण्मासार्द्धायनादपि ।
मण्डलान्मासमात्राद्वा पक्षाद्वा त्रिदिनादपि ॥ ५५ ॥

दिवसान्ते तु देवेशि ! ज्ञात्वा कार्यस्य गौरवम् ।
षट्कर्माणि प्रयुञ्जीत यथोक्तफलसिद्धये ॥ ५६ ॥

यदैव ज्ञायते कार्यं तदा काले तथैव हि ।
गुरूणां वचनाद्देवि ! क्रियतां कर्मसंचयः ॥ ५७ ॥

गुरुवाक्यं यदाप्राप्तं सिद्धिस्तत्र न संशयः ।
तस्मात्सर्वप्रयत्नेन गुरुरेव परात्परम् ॥ ५८ ॥

शुचिर्मन्त्री लिखित्वैवं वेष्टितं पदसूत्रकैः ।
साध्यसाधकयोः प्राणप्रतिष्ठां सम्यगाचरेत् ।
देवहस्तगतं लब्ध्वा धारयेत्साधकोत्तमः ॥ ६० ॥

करे कण्ठे शिखायां वा यथा संल्लिखितं भवेत् ।
श्रद्धावतो गुरोर्भक्त्या सर्वत्र फलभाग्भवेत् ॥ ६१ ॥

---

अर्द्धायनान्मासत्रयात् । मण्डलादेकोनपञ्चाशद्दिवसात् ॥ ५५ ॥

कार्यस्य गौरवं ज्ञात्वा दिनत्रयपक्षमासमण्डलार्द्धायनायन-वर्षवर्षत्रयाणामन्यतमावधिकालमनुसृत्य दिवसान्ते षट्कर्माणि प्रयुञ्जीत ॥ ५६ ॥

कार्यं शान्त्यादिकं कर्म यदैव यस्मिन्काले एव ज्ञायतेऽवश्यं कर्त्तव्यतया निश्चीयते तदा तस्मिन्काले समये तथैव पूर्वोक्तप्रकारेणैव प्रयुंजीतेति पूर्वेणान्वयः ॥ ५७–५८–५९ ॥

साध्यं देवता, साधकः फलाभिलाषी, तयोः, प्राणप्रतिष्ठायन्त्रोपरि साधकस्य नित्यं कर्मावसरे कृतापि प्राणप्रतिष्ठाप्रसंगादधुनोक्ता न तु साम्प्रतं सा कार्येति केचन प्रोचुस्तदयुक्तं नित्यकर्मसमाप्त्यनन्तरं काम्यककर्मणोऽनुष्ठीयमानत्वात्तदंगानिभूतशुद्धयादीन्यवश्यं कर्त्तव्यानि, अन्यथा काम्योक्तभूतशुद्ध्यादीनां वैयर्थ्यं स्यात् । नित्यकर्मान्तर्गतकाम्यकर्मणां पुनः करणेदोषाश्रवणाच्च । सम्यक् क्रव्यादिपूर्वकं देवहस्तगतं गुरुहस्तगतं गुरुर्देवोत्याद्युक्तिप्रसिद्धेः तच्च भावनयैव ॥ ६०–६१ ॥

पाशबीजं समुच्चार्य मायाबीजं ततो वदेत् ।
अंकुशान्ते तु यं रं लं वं शं षं सं समोरितम् ॥ ६२ ॥

तदन्ते हंसमंत्रः स्यात्ततोऽमुष्यपदं ववेत् ।
प्राणा इति वदेत्पश्चादिहप्राणास्ततः पर ॥ ६३ ॥

अमुष्यजीवः स्थितोऽमुष्यपदं च ततो वदेत् ।
सर्वेन्द्रियाणि सर्वान्ते वाङ्मनश्चक्षुरीरितम् ॥ ६४ ॥

श्रोत्रघ्राणपदे पश्चादिहागत्य सुखं चिरम् ।
तिष्ठन्त्वग्निवधूः प्राणप्रतिष्ठामनुरीरितः ॥ ६५ ॥

प्रत्यमुष्यपदं पूर्वं पाशादीनि प्रयोजयेत् ।
प्रयोगेषु समाख्यातः प्राणमन्त्रोमनीषिभिः ॥ ६६ ॥

स्थापयेन्मनुनानेन प्राणान्सर्वत्र देशिकः ।
वहच्छ्वासं करे स्पृष्ट्वा यन्त्रं संमन्त्रयेत्ततः ॥ ६७ ॥

एवं तव मया प्रोक्तं प्राणानां स्थापनं परम् ।
एवं क्रमेण ते ज्ञेयं सर्वकार्येषु सर्वदा ॥ ६८ ॥

---

पाशः आं, ह्रीं अंकुरी क्रों, एतदन्ते यादीनि, तसन्ते हंसः ततः अमुष्यपदं, तच्च यन्त्राधिष्ठातृदैवषष्ट्यन्तनामलिंगसहचरं कर्त्तव्यं सम्प्रदायात् ॥ ६२–६३ ॥

जीव इत्यनन्तरमिह पदं तस्याद्यन्तनिदर्शनात्, एवं सर्व इत्यापि । सर्वान्ते पाशादिद्वादशाक्षारामुष्यपदान्ते ॥ ६४–६५ ॥

प्रत्यमुष्यपदं यत्र यत्रामुष्यपदं तत्र तत्र पूर्वं पाशादिद्वादशाक्षराणि प्रयोजयेदित्यर्थः ।

आं ह्रीं क्रों यं रं वं शं षं सं हं सः अमुष्यप्राणा इह प्राणाः आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः अमुष्य जीव इह स्थितः आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः अमुष्य सर्वेन्द्रियाणि इह स्थितानि आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः वाङ्मनश्चक्षुः श्रोत्रघ्राणानीहागत्य सुखं चिरं तिष्ठन्तु स्वाहेत्युद्धारः ॥ ६६ ॥

सर्वत्र साध्यसाधकविषये, वहच्छ्वासं यथास्यात्तथा करे धृत्वांगुलीभिः स्पृष्ट्वेत्यर्थः करे धारणं चाधारसंलग्नतया ॥ ६७–६८ ॥

यन्त्राणि कतिचित्तानि यानि तानि वदाम्यहम् ।
यन्त्रे हि यन्त्रता प्रोक्ता यमने शमने परम् ॥ ६९ ॥

यन्त्र्यते सकलं विश्वं यन्त्रमित्यभिधीयते ।
यन्त्रं सन्त्रायते त्रातं यन्त्रार्थस्तदुदीरितः ॥ ७० ॥

यन्त्रं गोप्यं कृतं यत्नैः फलदं भवति प्रिये ।
अङ्कानां चापरे भेदा यन्त्राणां चापरे मताः ।
यन्त्राकमंजसा देवि ! सर्वसिद्धि प्रसाधयेत् ॥ ७१ ॥

इदानीं वर्गसंख्यां तु कथयामि समासतः ।
अष्टवर्गान्समुद्दिश्य नामतस्तान्ब्रवीम्यहम् ॥ ७२ ॥

अ आ इ ई उ ऊ चैव ऋ ॠ ऌ ॡ तथैव च ।
ए ऐ ओ औ च अं अश्च अवर्गः षोडशार्णकः ॥ ७३ ॥

कवर्गः पञ्चवर्णः स्यात्कखगेतिघङास्तथा ।
चवर्गः पञ्चवर्णः स्याच्चछजाश्च झञास्तथा ॥ ७४ ॥

टवर्गः पञ्चवर्णः स्याट्टठडढणसंयुताः ।
तवर्गः पञ्चवर्णोऽत्र तथदाधनसंयुताः ॥ ७५ ॥

पञ्चवर्णः पवर्णोऽपि पफबभमसंयुताः ।
यवर्गस्तुर्यवर्णः स्याद्यरलावार्णसंयुताः ॥ ७६ ॥

---

तान्यागमारम्भे त्वया पृष्टानि यन्त्राणि कतिचिदहं वदामि यानि प्रकरणारम्भे प्रतिज्ञाविषयीभूतानि तानि त्वं शृण्विति शेषः हि यतः यमने इत्यस्य विवरणं शमने इति । तथा च यतः शमने परं तत् परं ततो यन्त्रे यन्त्रतेत्येकोर्थः ॥ ६९ ॥

यन्त्र्यते नियम्यते रोगकृत्यादिभ्यो व्यावर्त्यत इति द्वितीयः । अत्रान्तकेनाप्यरक्षितम् । यन्त्रार्थस्तृतीयः । तत् तस्मात् ॥ ७० ॥

अंकानां भेदाः कार्यसिद्धिविधायका अपरे भेदाः यन्त्राणां चापरे भेदाः कार्यसिद्धिविधाय कामतास्तन्त्रान्तरे प्रतिपादिताः । तत्र यन्त्राकं समाहाररूपमंजसा सुखेनैव सर्वसिद्धि प्रसाधयेत् । ते तु कृच्छ्रेण सिद्धि प्रतिपादयन्तीति भावः ॥ ७१ ॥

इदानीमित्यनेन सिद्धिप्राप्तिद्वारकतया वर्गसंख्या वर्गनामानि चोक्तानि ॥ ७२–७६ ॥

शवर्गंगा एव वर्णाः क्षशषाः सहलान्विताः ।
केषांचित्पंचवर्णोत्र शवर्गः परिकीर्त्तितः ॥ ७७ ॥

वर्णान्संज्ञाय सम्यग्वै यन्त्रधारणकर्मणि ।
कर्तव्या चांकसंख्यानां गणना वर्गवर्णके ॥ ७८ ॥

युग्मस्वरेण संयुक्तं गणयेद्देशिकोत्तमः ।
गणनाविधिमुल्लंघ्य वर्गसंख्यामजानता ।
यन्त्रं नैव च कर्त्तव्यं यदीच्छेत्सिद्धिमात्मनः ॥७९॥

भूभूपुरं त्रिकोणं च वर्त्तुलं नवकोणकम् ।
अष्टारं चतुरस्रं च चन्द्रार्द्धं वसुकोणकम् ॥ ८० ॥

पञ्चकोणं च षट्कोणं तथा वै सप्तकोणकम् ।
शतकोणं सहस्राख्यं कोणानां गणना स्मृता ॥ ८१ ॥

अथोच्यते समासेन रेखाणां क्रमणं शुभम् ।
येन विज्ञातमात्रेण यन्त्रविद्याविशारदः ॥ ८२ ॥

---

शवर्गः षड्वर्ण एव, केषांचिन्मुनीनां मतेऽत्र पञ्चवर्णः शवर्गः परिकीर्त्तितः ॥ ७७ ॥

वर्गस्य वर्णको वर्गवर्णकस्तस्मिन्, जातावेकवचनं वर्गार्णां वर्णेष्वित्यर्थः सम्यक् यथास्यात्तथा वर्णान्साध्यसाधकवर्णान्विज्ञाय अयं बर्ण एतद्वर्गीयोऽयं वर्ण एतद्वर्गीय इति ज्ञात्वा अङ्कसंख्यानां गणना साध्यसाधकाक्षरांकसंख्यानां गणना यन्त्रधारणकर्मणि कार्या ॥७८॥

अत्र गणनायां स्वरेण संयुक्तमक्षरं युग्मं गणयेन्नत्वेकम्, ये त्वन्यथा व्याख्यानं कुर्वन्ति न हि ते आगमशास्त्रविदः । श्रीपरमेश्वरस्थापितपञ्चवर्णात्मकशवर्गसन्मतिकमुनिपक्षेऽक्षारत्रयेण कोष्ठकपूर्त्यसम्भवाच्चातिनिर्लज्जाः । एतस्य विधिमात्रत्वाज्ज्ञानमात्रमित्याह गणनेति ॥ ७९ ॥

भूभूपुरमित्याभ्यां वक्ष्यमाणयन्त्राणां कोष्ठरचनाप्रकारो दर्शितस्तस्य न्यासाः । शतसहस्रयोः स्थानाभावान्न दर्शितौ ॥ ८०–८१ ॥




अथानंतप्रतिज्ञायाम् ॥ ८२ ॥

अथातोऽहं प्रवक्ष्यामि रेखानां गणनाक्रमैः ।
सम्यग्यन्त्राणि विधिवद्दुर्लभानि कलौ युगे ॥ ८३ ॥
पश्चिमात्पूर्वगारेखाश्चतस्रो दक्षिणाग्रतः ।
उदग्ग्रास्तु तथा चक्रं नवकोष्ठात्मकं भवेत् ॥ ८४ ॥
पश्चिमात्पूर्वगाः पञ्चरेखास्तिर्यग्गतास्तथा ।
पञ्चरेखाः प्रजायन्ते कोष्ठाश्चापि च षोडश ॥ ८५ ॥
अनेनैव प्रकारेण रेखावृद्धिक्रमेण तु ।
चक्राण्यनेकान्युत्पाद्य विषमाणि समानि च ॥ ८६ ॥
तेष्वंकान्विलिखेत्प्राज्ञः सम्यग्विज्ञानतत्परः ।
इष्टांकपूरणोवायं तं ते वक्ष्यामि साम्प्रतम् ।
अशेषं नवकोष्ठेषु नास्ति शेषप्रपूरणम् ॥ ८७ ॥
प्रकृतेर्द्विगुणं कृत्वा त्रिगुणं वा चतुर्गुणम् ।
पूरयेदनया रीत्या नवकोष्ठे क्रमादरात् ॥ ८८ ॥

---

अथातो रेखाक्रमप्रतिज्ञानन्तरं कलौ युगे दुर्लभानि यन्त्राणि रेखाणां गणनाक्रमैर्विधिवत्कृत्वा सम्यक् यथा भवन्ति तथाहं प्रवक्ष्यामीत्यन्वयः । कलावित्यनेन जपसंख्याचातुर्गुण्याभावः सूचितः ८३

पश्चिमात्पूर्वगा दक्षिणादुत्तरगा इति नियमात्पश्चिमात्पूर्वनयने दक्षिणभागो मर्यादास्थलं दक्षिणादुत्तरनयने पश्चिमभाग इति ज्ञेयमेवं षोडशकोष्ठे ॥ ८४ ॥

तिर्यग्गता रेखास्तथा तद्वन्नवकोष्ठक्रमवत् दक्षिणाग्रत उदग्गताः कार्येत्यर्थः ॥ ८५ ॥

रेखावृद्धिः क्रमेणानुल्लंघनमर्यादया एकादिरेखास्मरणपूर्वकमित्यर्थः । अनेकानि चक्राणि सिद्धदारिद्र्यशमनपूर्वकाणि न तु प्रकरणान्तरोक्तानि नानाविधानि, चक्रपदेन यत्र स्मरणपूर्वकमुत्पादनं सूचितम् ॥ ८६ ॥

इष्टांकः साध्यसाधकाक्षरांकोत्पन्नः । तेन पूरणस्य यदुपायस्तं नवकोष्ठेषु शेषप्रपूरणं नास्ति किन्तु अशेषं सकलं, षोडशकोष्ठेषु तु शेषपूरणं ज्ञानं शिवपदे ज्ञानमित्याद्यस्त्येवेति कृतिस्मरणन्यायात् ८७

प्रकृतेः सकाशात् य इष्टांकः स तु प्रकृत्या तिष्ठतीति तस्य प्रकृतिसंज्ञा । द्व्यादिगुणस्य वक्ष्यमाणत्वादेकगुणस्तिष्ठतीत्यर्थः । क्रमस्य प्रतियन्त्रं प्रोक्तस्य आदरः स्वीकारस्तस्मात् । इष्टाकं प्रथमप्रोक्तकोष्ठे विन्यस्य द्वितीयप्रोक्तकोष्ठादिषु द्व्यादिगुणं कृत्वा लिखेदिति निर्गलितार्थः ॥ ८८ ॥

षोडशादिषु कोष्ठेषु सशेषं पूरयेद्बुधः ।
इष्टांकान् स्थापयन्मन्त्री क्वचित्तान् रागतो हरेत् ॥ ८९ ॥

प्रत्यंकान्गुणान्यन्त्रपंक्तिसंख्या समं लिखेत् ।
लिखित्वा पंक्तिभेदेन वारणेनैव पूरयेत् ॥ ९० ॥
पूरयेत्पूर्वमार्गेण पक्षेणानेन देशिकः ।
यन्त्रयन्त्रयोस्तु संख्याभिर्विभजेत्ताम्यथाक्रमात् ॥[7]९१ ॥

तत्रैकभागे प्रथमे कोष्ठे मन्त्री प्रपूरयेत् ।
द्वितीयादिषु कोष्ठेषु एकवृद्ध्या प्रपूरयेत् ॥ ९२ ॥
पंक्तिसंख्याविभागेन शेषांका ये भवन्ति ते ।
पुनः प्रोक्तक्रमेणैव पूरयेदंकशास्त्रतः ॥ ९३ ॥

क्रमोऽयं सर्वयन्त्राणां पूरणेषु मयोदितः ।
यन्त्रे षोडशकोष्ठाख्ये भरणेऽपि क्रमान्तरम् ॥ ९४ ॥
ज्ञानं शिवपदे ज्ञानं ज्ञानं गोप्तुः सुराननम् ।
इष्टार्द्धयूनितं तेषु गुप्तसारशिवापदैः ॥ ९५ ॥
नानारसतुलानाना नाना जपशानना ।
एकैकहीनमिष्टार्द्धं प्रागादिदिशकं क्रमात् ॥ ९६ ॥

माया बीजान्तरे लेख्याः सर्वे वर्णाः प्रयत्नतः ।
विन्द्यात्तृतीयकूटस्थात्तत्तदंकानुगुण्यतः ॥ ९७ ॥
ततत्तद् कोष्ठे लिखेद्वापि तत्तद्यन्त्रस्य मध्यतः ।
विलेखेद्वांच्छितं यन्त्रे मया प्रात्तेनवर्त्मना ॥ ९८ ॥

नवषोडशकोष्ठेषु विलिखेद्वर्णमण्डलम् ।
मातृकाक्षरविन्यासं तत्रादौ नवकोष्ठके ॥ ९९ ॥

अकारादिक्षकारान्तान्विन्यसेत्कोष्ठकेषु तान् ।
पंचपंचविभागेन ङत्रणास्तु विवर्जयेत् ॥ १०० ॥

पुनराद्येषु तिसृषु शेषान्वर्णान्समालिखेत् ।
नवकोष्ठेष्वनेनैव प्रकारेण लिखेत्प्रिये ॥ १०१ ॥

---

अत्रादिशब्दः प्रकारे शिव इत्येवं च विंशादिकोष्ठं शषपूरणकथनात् । षोडशकोष्ठप्रकारेषु कोष्ठेषु षोडषोरित्यर्थः । सशेषं समानशेषं । कोष्ठाष्ठकशेषं यथास्यात्तथेत्यर्थः । क्वचित्षोडशकोष्ठकप्रकारे । तानिष्टांकान् । रागत इच्छातः हरेत् लेख्यकोष्ठानित्यूहः ॥ ८९ ॥

अर्द्धं क्रमश एवार्द्धमेकाद्यूनं ततः क्रमः ।
स्वरान् काद्यान्विनाऽऽत्मनैः
क्षाद्यान्युत्क्रमतो लिखेत् ॥ १०२ ॥
षोडसाख्येषु यन्त्रेषु मातृकार्णान्समालिखेत् ।
लिखिते मातृकार्णे तु सर्वसिद्धिर्भवेत्प्रिये ॥ १०३ ॥
वर्गाष्टकं चतुर्दिक्षु क्रोधबीजेन वेष्टयेत् ।
मारबीजं वधूबीजं मायामध्ये समालिखेत् ॥ १०४ ॥
मात्रिकार्णैः समावेष्टच वहिर्बज्राष्टकेन च ।
लँ रँ टँ क्षँ वँ यँ सँ हँ चाष्टदिक्षु प्रविन्यसेत् ॥ १०५ ॥
हसौः बीजं यन्त्रमध्ये प्राणत्वेनानुकल्पयेत् ।
हंसबीजं दक्षपार्श्वे सोहं बीजं तु वामतः ॥ १०६ ॥
साध्यसाधकयोर्वर्णान् विलिखेद्यन्त्रमध्यतः ।
एवं यन्त्रं समुत्पाद्य क्रोधपाशांकुशैः क्रमात् ॥ १०७ ॥
वेष्टयित्वा ततः पश्चाद्वेष्टयेत्तद्वृवेण तु ।
ततः सिद्धि. प्रजायेत नान्यथा ममभाषितम् ॥ १०८ ॥
इति ते कथितं भद्रे ! यन्त्रलेख्यविधानकम् ।
समासेन कुलेशानि ! कथयिष्येप्यतः परम् ॥ १०९ ॥

॥ इति सर्वतन्त्रोत्तमे दक्षिणामूर्त्तिपार्वतीसंवादे
शिवताण्डवे द्वादशः पटलः ॥

श्री दक्षिणामूर्त्तिरुवाच—

अतः परं प्रवक्ष्यामि गोपनीयं त्वयानघे: ! ।
गुरुवाक्यादृतेनैव प्राप्तव्यं जन्मकोटिभिः ॥ १ ॥
समं च विषमं चैव विषमं च समं ततः ।
समाभ्यां विषमं हन्याद्विषमेण समं पुनः ॥ २ ॥
समं च विषमं चैव विषमेण समेन च ।
विषमैश्च समं हन्याद्विषमै मार्गमाहरेत् ॥ ३ ॥
समेषु विषमं ज्ञेयं विषमेषु समं प्रिये ।
पूर्वं समं कार्ययोगात्पश्चाद्विषमकं प्रिये ॥ ४ ॥
पूर्वं तु विषमं ज्ञेयं कार्ययोगात्समं पृथक् ।
कोष्ठानां ज्ञानवशतः समं च विषमं भवेत् ॥ ५ ॥
समं च परिजानातु यन्त्रे ज्ञानसमाकुले ।
वेत्ता भवति सर्वेषां यन्त्राणां देशिकोत्तमः ॥ ६ ॥
साध्यसाधकयोर्वर्णानिकीकृत्य विधानवित् ।
विलिखेत्पूर्वपूर्वाच्च वृद्धितः परकोष्ठके ॥ ७ ॥

श्रीपार्वत्युवाच—

देवेश ! भक्तिसुलभ ! करुणार्णवविग्रह ! ।
सर्वज्ञाननिधे ! नाथ ! वदस्व कृपया विभो ॥ ८ ॥
साध्यवर्णाः कथ ज्ञेयाः कथं साधकवर्णकाः ।
तेषां वर्णाः कथं ज्ञेया उभयोर्भक्तिभावित ॥ ९ ॥
एतत्सर्वं ममाचक्ष्व विचार्य त्रिपुरान्तक ! ॥ १० ॥

श्रीदक्षिणामूर्त्तिरुवाच—

शृणु देवि ! महाप्राज्ञे ; सर्वयन्त्रार्थसिद्धये ।
रहस्यं सम्प्रवक्ष्यामि साध्यसाधकयोर्भवम् ॥ ११ ॥
साध्यस्तु देवता ज्ञेया साधकः कार्यलोलुपः ।
मयोक्तेषु तु यन्त्रेषु साध्यनामानि वै पृथक् ॥
कथयिष्ये वरारोहे ! साम्प्रतं साधकं शृणु ॥ १२ ॥
साधको यस्य वै कार्यं तन्नामाक्षरसंख्यया ।
देवदत्तेति यन्नाम तन्नामांकस्य मेलनम् ॥ १३ ॥
स्वरांकांस्तु पृथग्ग्राह्या हलाकारस्तु पृथक्कृताः ।
मेलयित्वा तु तान् सर्वानिकीकृत्य विधानवित् ॥१४॥
शम्भुकोष्ठं तु प्रथमं द्वितीयं तस्य दक्षिणे ।
तद्दक्षिणं तृतीयं स्यादेवमग्रेपि कल्पना ॥१५॥

लेखनस्य प्रकारोऽयं कथितस्तव सुव्रते ! ।
साम्प्रतं शृणु देवेशि ! वर्णांकमितकोष्ठकम् ॥१६॥
वेदरेखाः समाः कार्या दक्षिणोत्तरदिग्गताः ।
तथा सप्तदशैवेति कार्याः प्राक् पश्चिमाश्रिताः ॥१७॥
जायते वर्णयन्त्रं च सर्वतः परिसंस्कृतम् ।
ज्ञेयं गुरूपदेशेन अन्यथा विफलप्रदम् ॥१८॥
कथयिष्ये मातृकार्णानंकसंख्यासमन्वितान् ।
अकारे गजसंख्यांकमाकारे वाणसंख्यकम् ॥१९॥
इकारे गजसंख्या स्यादीकारे पक्षसंख्यया ।
उकारे वह्निसंख्यातमूकारे वेदसम्मितम् ॥२०॥
ऋकारे शशिसंख्यातमॄकारे स्वरसम्मितम् ।
ऌकारे रससंख्यातं ॡकारे मुनिसम्मितम् ॥२१॥
एकारे तर्कसंख्यातमैकारे वेदसम्मितम् ।
ओकारे चन्द्रसंख्यातमौकारे नेत्रसम्मितम् ॥ २२ ॥
अंकारे वह्निसंख्यं तु अःकारे पञ्चसम्मितम् ।
स्वरांकाः कथिता भद्रे ! कादीनां चाधुना शृणु ॥२३॥
ककारे नेत्रसंख्यातं खकारे वह्निसंमितम् ।
गकारे पञ्चसंख्यातं घकारे गजसंमितम् ॥२४॥
ङकारे पञ्चसंख्यातं चकारे चाष्टसमितम् ।
छकारे युग्मसंख्यातं जकारे वह्निसंमितम् ॥२५॥
झकारे वेदसंख्यातं ञकारे भूमिसंमितम् ।
टकारे मुनिसंख्यातं ठकारे तूमिसंमितम् ॥२६॥
डकारे मुनिसंख्यातं ढकारे रससंमितम् ।
णकारे वेदसंख्यातं तकारे च धरामितम् ॥२७॥

वर्णयन्त्रम्

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ | ॠ | ऌ | ए | ऐ | ओ | औ | अ | अ |
| ८ | ५ | ३ | २ | ३ | ४ | १ | ७ | ६ | ६ | ४ | १ | २ | ३ | ५: |
| घ | ङ | ऊ | छ | ज | झ | ञ | ट | ठ | ड | ढ | ण | त | थ | द | ध |
| ८ | ५ | २ | २ | ३ | ४ | १ | ७ | ६ | ६ | ६ | ४ | १ | २ | ३ | ५ |
| न | प | १ | १ | म | म | य | र | ल | व | श | ष | स | क /ह | ख | ग/क्ष |
| ८ | ५ | २ | २ | ३ | ४ | १ | ७ | ६ | ७ | ६ | ४ | १ | २ | ३ | ५ |

थकारे युग्मसंख्याकं दकारे वह्निसंख्यकम् ।
धकारे कामसंख्याकं गजसंख्यं नकारके ॥२८॥

पकारे पञ्चसंख्याकं फकारे गजसंमितम् ।
वकारे पक्षसंख्याकं भकारे तु शिवाक्षिकम् ॥२९॥
वेदसंख्या मकारे तु यकारे भूमिसंमतम् ।
सप्तसंख्यं रकारेपि रससंख्यं लकारके ॥३०॥
वकारेपि च मुन्यङ्कं रसांकं च शवर्णके ।
षवर्णे तु तथा वेदाः सवर्णे शशिसंख्यया ॥३१॥
कवर्णांकं हकारेपि कवर्णं पुरवो लिखेत् ।
क्षवर्णं गार्णसंख्याकं पुरतो विलिखेत्प्रिये ॥३२॥
इत्यर्णनामसंख्या तु कथिता ते वरानने ! ।
सम्यग्विज्ञाय भावेन मेलनं च ततः कुरु ॥३३॥
प्रथमं सिद्धियन्त्रं तु कथयिष्ये तवाग्रतः ।
सिद्धयन्त्रस्य साध्यं तु त्रिपुरा नाम देवता ॥३४॥

सिद्धयन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

साध्यवर्णांकसंख्या तु मेलयित्वा वरानने ।
हलानां च स्वराणां च संख्यां सम्यग्विधाय च ॥३५॥
साध्यसाधकवर्णांकान् गजभक्तान् प्रकल्पयेत् ।
तदुच्चारितसंख्याकं नवकोष्ठेषु विन्यसेत् ॥३६॥
अथवांकं तु संमेल्य त्रिघ्न चाष्टहृतं पुनः ।
नवभिः संयुतं कृत्वा विलिखेन्नवकोष्ठके ॥३७॥
अथवान्यप्रकारेण मेलयित्वा तदंककान् ।
द्वियुक्तान्सप्तविहृतान् नवयुक्तान् गजैर्हृतान् ॥३८॥
विलिखेत्सर्वकोष्ठेषु वृद्धितोंकान्समाहितः ।
नवकोष्ठात्मकं यन्त्रं विरच्य विधिवत्प्रिये ! ॥३९॥
तदंकं विलिखेत्कोष्ठे नेत्रसंख्ये ततः परम् ।
सप्तमे षष्ठकोष्ठे तु नवमे पञ्चमे ततः ॥४०॥

प्रथमे वेदसंख्ये तु तृतीये चाष्टमे प्रिये !।
विलिखेद्वृद्धितो देवि ! अंकानां पूर्त्तिसंख्यया ॥४१॥
पूर्वोक्तवर्णान्संलिख्य पूर्वं-पूर्वं विधानतः।
यन्त्रं निष्पाद्य देवेशि ! मुद्रिकायां समालिखेत्।
प्रातरुत्थाय तां मुद्रां द्रष्टवा दुःखैर्नलिप्यते ॥४२॥
प्रक्षाल्य जलमध्ये तु मुद्रिकां मुखधावनम्।
कुरुते यो नरो देवि ! न स दुःखैः प्रबाध्यते ॥४३॥
बालस्य कण्ठसंलग्नं यन्त्रं दुष्कृतिनाशनम्।
महायन्त्रं वरारोहे ! भाण्डागारे तु निःक्षिपेत् ॥
कुबेर इव वित्ताढ्यो जायते मण्डलात्प्रिये ! ॥४४॥
इति ते हि समाख्यातं महायन्त्रं परात्परम्॥४५॥

इति सिद्धयन्त्रं प्रथमम्।

श्रीदक्षिणामूर्त्तिरुवाच—

शृणु ते संप्रवक्ष्यामि यन्त्रं सम्मोहनं परम्।
येन विज्ञातमात्रेण सर्वसिद्धिमवाप्नुयात् ॥४६॥

संमोहनं यन्त्रम्

| | | |
|---|---|---|
| २ | ७ | ६ |
| ९ | ५ | १ |
| ४ | ३ | ८ |

षष्ठे च प्रथमे चाष्टे सप्तमे बाणसंज्ञके।
तृतीयेपि द्वितीयेपि पञ्चाच्च नवमे बुधः ॥४७॥
तुर्य-कोष्ठे लिखिद्देवि ! सम्यग्विज्ञाय मानसम्।
साध्यमत्र भवेद्देवि ! शिखिपिच्छाभिधं बृहत् ॥४८॥
साध्यसाधकयोर्वर्णान् रविघ्नान् पञ्चभाजितान्।
पूर्वोक्तैरष्टगन्धैस्तु विलिखेत्सर्वयन्त्रकम्।
धारणाच्चास्य यन्त्रस्य जगत्संमोहनं ध्रुवम् ॥४९॥
इति सम्यक्समाख्यातं यन्त्रं संमोहनं नृणाम्।
राज्ञां राजपत्नीनां सिंहव्याघ्रादिकर्षणम् ॥५०॥

इति संमोहनं द्वितीयं यन्त्रम्।

भूतविद्रावणं चान्यत्सम्यक्त्वं श्रोतुमर्हसि ।
नामोच्चारेण यन्त्रस्य भूतानां शमनं परम् ॥५१॥

**भूतविद्रावणं यन्त्रम्**

| | | |
|---|---|---|
| ४ | ९ | २ |
| ३ | ५ | ७ |
| ८ | १ | ६ |

अष्टमेपि तृतीयेपि चतुर्थे सुरसुन्दरि ! ।
प्रथमे पञ्चमे पञ्चान्नवमे रससंज्ञिते ॥५२॥
सप्तमे नेत्रसंख्येपि लिखेदंकाननुक्रमात् ।
साध्यमत्र तु देवेशि ! त्वरिताकुलनायिका ॥५३॥
साध्यसाधकयोर्वर्णान् सप्तसंभाजितान् कुरु ।
अथवा नवसप्तत्या विभजेत्सुरमानतः ॥५४॥
अष्टभिः पूर्वद्रव्यैश्च विषनामांकमेलितैः ।
धारणाच्चास्य यन्त्रस्य भूतानां संक्षयो भवेत् ॥५५॥
डाकिनीशाकिनीभूतप्रेतवेतालसंज्ञितान् ।
वशमानयते देवि ! भस्मीभूतान् करोत्यसौ ॥५६॥
इति सम्यक्सुगदितं यन्त्रं भूतविदारणम् ।
पुत्राय भक्तियुक्ताय दत्त्वा भवेद्ध्रुवः ॥५७॥
इति भूतविद्रावणं यन्त्रम् ।
अथ वक्ष्ये परं यन्त्रं जगद्विजयसंज्ञकम् ।
इदं यन्त्रं वरारोहे सद्यः प्रत्ययकारकम् ॥५८॥

**जगद्विजयदं यन्त्रम्**

| | | |
|---|---|---|
| ६ | ७ | २ |
| १ | ५ | ९ |
| ८ | ३ | ४ |

मया धृत्वा महादेवि ! त्रिपुरो निहतः पुरा ।
तुर्यकोष्ठे वह्निकोष्ठे कोष्ठे तु गजसंमिते ॥५९॥
नवकोष्ठे वाणकोष्ठे प्रथमेपि द्वितीयके ।
सप्तमे रससंज्ञेपि विन्यसेत्सुसमाहितः ॥६०॥
इदं यन्त्रं विजयदं द्रव्यैः पूर्वोदितैर्लिखेत् ।
साध्यमत्र भवेद्देवि विरजासुरसुन्दरी ॥६१॥
लिखित्वा यन्त्रराजं तु भेर्यां संस्थापयेद्बुधः ।
अथवा तु पताकायां वाहनोपरि धारयेत् ॥६२॥
शत्रून्सर्वान् पराभूय विजयी मानवो भवेत् ॥६३॥
इदं गोप्यं त्वया भद्रे ! ममातिप्रियमुत्तमम् ।
जगद्विजयदं यन्त्रं श्रुत्वा गोप्यं त्वयानघे ! ॥६४॥

इति जगद्विजयदं यन्त्रम् ।

त्रैलोक्यमोहनं चान्यत्सम्यक् शृणु वरानने ! ।
द्वितीये सप्तमे षष्ठे नवमे पञ्चमे पुनः ॥६५॥
प्रथमे तुर्यकोष्ठे च तृतीये नागसंमिते ।
विलिखेदमुना देवि ! प्रकारेण समाहितः ॥६६॥
त्रैलोक्यविजयं नाम यन्त्रं मम प्रियंकारकम् ।
साध्यसाधकयोर्वर्णान् रससप्ताष्टभाजितान् ॥६७॥

त्रैलोक्यविजयं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

अथवा सप्तवसुभिरथवा नवपञ्चकैः ।
साध्यमत्र वरारोहे चण्डिकादेवता परा ॥६८॥
पूर्वोक्तैरेव संलेख्य गन्धैश्चातिमनोहरैः ।
धारयेन्मस्तके भद्रे ! अथवा बाहुमूलके ॥६९॥
पुटके तु समाधाय स्थाने विमलसंज्ञके ।
इदं त्रैलोक्यविजयं तवाग्रे प्रकटीकृतम् ॥७०॥

इति त्रैलोक्यविजयं यन्त्रम् ।

आपद्धरमिदं यन्त्रं सद्यः प्रत्ययकारकम् ।
महादुःखे महाकष्टे महाव्याधौ महाभये ॥७१॥

आपद्धरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ९ |
| ७ | ५ | ३ |
| २ | ८ | ४ |

मानसे राज्यदे कष्टे धारयेद्यन्त्रनायकम् ।
साध्यसाधकयोर्वर्णान् रससंख्याविभाजितान् ॥७२॥
साध्यमत्र वरारोहे ! हिंगुला नाम देवता ।
इदं यन्त्रं वराधक्यं कण्ठे वाहौ तु धारयेत् ॥७३॥
न दुःखं जायते तस्य विलिखेद्गन्धचन्दनैः ।
पूजयेत्तु प्रयत्नेन यावद्दुःखं प्रशाम्यति ॥७४॥
इदं यन्त्रं समाख्यातं गोप्यं प्राणाधिकं मम ॥७५॥

इत्यापद्धरं यन्त्रम् ।

अथ वक्ष्ये विधानेन सर्ववश्यकरं परम् ।
यन्त्रं सम्यग्लिखित्वा तु मानिनि ! प्राणतोधिके ॥७६॥
युग्मे तुरंगे तर्के तु नवमे पञ्चमादिमे ।
पुनश्चतुर्थे विलिखेत्तृतीये गजसंमिते ॥७७॥
साध्यसाधकयोर्वर्णान्सिप्तसप्तनवेहृतान् ।
विलिखेत्परमेशानि यन्त्रं सर्ववशं करम् ॥७८॥

सर्ववशकरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

साध्यमत्र महादेवी देवता कुलसुन्दरी ।
धारयेद्धृदये देवि दक्षबाहौ तथा प्रिये ॥७९॥
इदं यन्त्रं सदा धार्यं मम चातिप्रियं करम् ।
मया संधार्यते नित्यं लोकवश्यार्थ-सिद्धये ॥८०॥

इति सर्ववशंकरं सप्तमं यन्त्रम् ।

अथ सम्यक् शृणु प्राज्ञे यन्त्रं कर्षणकारकम् ।
भूदेशवनितावृक्षनदीनदसु संज्ञिता ॥८१॥

आकर्षणं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

हिरण्यवस्त्रदेवादि-प्रतिमा चालनं परम् ।
अश्वद्वयं ततो नागो मन्त्री वारद्वयं भवेत् ॥८२॥

नागश्चापि तुरंगौ च विलिखेद्द्वौ विभागशः ।
साध्यसाधकयोर्वर्णान्विभज्य जगती रसैः ॥८३॥

विलिखेन्मध्यकोष्ठादिकोष्ठप्रथमपंक्तितः ।
साध्यमत्र वरारोहे देवी मधुमती स्वयम् ॥८४॥

विलिखेच्चाष्टगन्धैश्च मनोऽभिलषितप्रदम् ।
कण्ठे बाहौ धारयेद्यो नरो नरशताधिपः ॥८५॥

इदं यन्त्रं समाख्यातं कर्षणं सर्वदेहिनाम् ।
न देयं परशिष्येभ्यो मान्यं मम वचो यथा ॥८६॥

इत्याकर्षणं यन्त्रमष्टमम् ।

शृणु भद्रे ! परं यन्त्रं निधिदर्शनकारकम् ।
भूमिस्थं च जलस्थं च तथा पर्वतसंस्थितम् ॥८७॥

**निधिदर्शनं यन्त्रम्**

| | | |
|---|---|---|
| ४ | ९ | २ |
| ३ | ५ | ७ |
| ८ | १ | ६ |

राजगृहे स्थितं यच्च बहुकालेन विस्मृतम् ।
स्ववंशे स्थापितं यच्च यच्च कालेन हापितम् ॥८८॥
तं निधिं कुरुते ज्ञातं यन्त्रं तद्वच्मि सांप्रतम् ।
अष्टमे च तृतीये च चतुर्थे प्रथमे भवेत् ॥८९॥
पञ्चमे नवमे कोष्ठे रसे सप्तमके तथा ।
द्वितीये तु वरारोहे विलिखेच्छास्त्रमार्गतः ॥९०॥
साध्यसाधकयोर्वर्णान्द्विगुणान्सप्तभाजितान् ।
मध्यकोष्ठं समाश्रित्य बिलिखेन्मन्त्रवित्तमः ॥९१॥
साध्यमत्र वरारोहे भोगिनीतलवासिना ।
इदं यन्त्रं स्थले तस्मिन् स्थापयित्वा गवेषयेत् ॥९२॥
सम्यक्संलभते द्रव्यं निधिं नवविधं प्रिये ! ।
मया भगवते पूर्वं विष्णवे प्रभविष्णवे ॥९३॥
कथितं प्रकटीकृत्य तवाग्रे चाधुना प्रिये ।
सर्वस्वदायिने वाच्यं सुप्रजायापि वा प्रिये ॥९४॥

इति निधिदर्शनं यन्त्रं नवमम् ।

अथ वक्ष्ये बालरक्षाकरं यन्त्रं हितार्थदम् ।
बालानां पूतनादोषहरणं भयनाशनम् ॥९५॥
तुर्ये चैव तृतीयेपि नागाख्ये नवमे पुनः ।
पंचमे प्रथमे नेत्रे सप्तमे रससंज्ञिते ॥९६॥

विलिखेत्परमेशानि शास्त्रदृष्टया विचक्षणः ।
साध्यसाधकयोर्वर्णान् वेदघ्नान्नवभाजितान् ॥९७॥

**बालरक्षाकरं यन्त्रम्**

| | | |
|---|---|---|
| ६ | ७ | २ |
| १ | ५ | ९ |
| ८ | ३ | ४ |

मध्यकोष्ठाद्विपंक्तेस्तु विभज्य पुनरग्रतः ।
साध्यमत्र भवेद्देवि शीतला परमेश्वरी ॥९८॥
पूर्वोक्तद्रव्यविभवैर्यथाविधि परमेश्वरि ।
धारयेत्कण्ठमध्ये तु बालस्य सततं प्रिये ॥९९॥
न पूतना भयं तस्य डाकिनीशाकिनी भयम् ।
वह्निदाहभयं तस्य आधिःव्याधिविनाशनम् ॥१००॥
इदं यन्त्रं बालरक्षाकरं तव हिताय वै ।
कथितं तु मया सम्यग्विचार्य यन्त्रनायकम् ॥ १०१ ॥

इति बालरक्षाकरं यन्त्रम् ।

अथातस्स्तम्भनं वक्ष्ये यन्त्रं मम प्रियं करम् ।
स्तंभनं च रथाश्वानां गजानां मदशालिनाम् ॥ १०२ ॥

**स्तम्भन यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

दुष्टानां विषनागानां सलिलाग्रमहीरुहाम् ।
स्तंभनं पररा्ष्ट्रस्य वादिनो बुद्धिकीलनम् ॥ १०३ ॥

योषितां मनसस्तंभं यन्त्रं चैव करोति हि ।
अश्वद्वयं गजश्चैको मन्त्रिद्वयमतः परम् ॥ १०४ ॥

**जगन्मोहनं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

गजोश्वोऽश्वश्च प्रथमाद्विलिखेन्मध्यकोष्ठतः ।
साध्यसाधकयोर्वर्णान् त्रिगुणान्मूलभाजितान् ॥१०५॥
मध्यकोष्ठं समाश्रित्य यावत्संख्यांकपूरणम् ।
साध्यमत्र समाख्याता बगला दुष्टघातिनी ॥ १०६ ॥
पूर्वोक्तैः सहरिद्रैश्च हरितालेन मेलितैः ।
विलिखेद्यंत्रराजं तु सर्वस्तंभनकारकम् ॥ १०७ ॥
धारयेद्वामबाहौ वा वामपादेथवा प्रिये ।
धारणाद्यन्त्रराजस्य स्तंभयेदखिलानरीन् ॥ १०८ ॥
इदं यन्त्रं मयाख्यातं कार्त्तिकेयाय सुन्दरि ! ।
दैत्यसेनास्तंभनार्थं ततो ख्यातं तवाग्रतः ॥ १०९ ॥

इति स्तम्भनयन्त्रम् ।

जगन्मोहननामानं यन्त्रं सम्यग्ब्रवीमि ते ।
मोहनं राजपत्नीनां राज्ञां धनवतां तथा ॥ ११० ॥
रिपूणां राजतुल्यानां व्यावहारिकसद्दृदाम् ।
हितदं परमं यन्त्रं शृणु ज्ञान-विशारद ॥ १११ ॥
तुरगस्तुरगोदन्तो यन्त्री मन्त्री ततः परम् ।
पुनर्नागः पुनश्चाश्वस्तुरगस्तदनन्तरम् ॥ ११२ ॥
नवकोष्ठं समालिख्य यथानुक्रमयोगतः ।
साध्यसाधकयोर्वर्णानेकीकृत्यांकभाजितान् ॥ ११३॥
पञ्चभिर्गुणितान्सप्तभाजितान् पूरयेद्बुधः ।
साध्यमत्र विदित्वा तु देवीं श्रीभुवनेश्वरीम् ॥ ११४ ॥

पूर्वोक्तैरेव सद्द्रव्यैर्मधुरत्रयमिश्रितैः ।
विलिखेद्यंत्रराजं तु जगन्मोहनकारकम् ॥ ११५ ॥

मोहयेत्सकलान् राज्ञो जगत्स्थावरजंगमान् ।
देवता प्रतिमां वाणीं योषितं जनसंकुलम् ।
मोहयेद्दयिते सर्वं नात्र कार्या विचारणा ॥ ११६ ॥

इदं यन्त्रं जगन्मोहजननं शुभदं हितम् ।
गोप्यं त्वया वरारोहे ! वन्ध्याय तु न दापयेत ॥ ११७ ॥

इति जगन्मोहनं द्वादशं यन्त्रम् ।

अतः परं प्रवक्ष्यामि महापदप्रदायकम् ।
यन्त्रं वक्ष्यामि ते देवि ! मम चातिप्रियं करम् ॥११८॥

**महापदप्रदायकं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

राज्यदं चेन्द्रपददं भुवनत्रयदं त्विदम् ।
राष्ट्रदं द्विपदं देवि यन्त्रं सर्वार्थसिद्धिदम् ॥ ११९ ॥

घोटकस्तुरगोदंती प्रकृतिः प्रकृतिः पुनः ।
पुनर्हस्ती पुनश्चाश्वस्तुरगश्चयथाक्रमम् ॥ १२० ॥

मध्यकोष्ठं समाश्रित्य विलिखेत्साधकोत्तमः ।
साध्यसाधकयोर्वर्णान्विभज्य नवभिस्तथा ॥ १२१ ॥
गुणितान् पञ्चनवभिः शेषं संपूरयेद्बुधः ।
साध्यमत्र दयासिंधो दुर्गा दुर्गत्तिनाशिनी ॥ १२२ ॥
पूर्वोक्तैरष्टगंधैश्च विलिखेत्सुसमाहितः ।
महापदप्रदं शीघ्रं राज्यदं धनदं महत् ॥ १२३ ॥
गजाश्वरथसम्पत्तिविविधार्थविधायकम् ।
मम प्रियं मया पूर्वं ब्रह्मणे समुदाहृतम् ॥ १२४ ॥

इदं यन्त्रं मया तुभ्यं महापदविधायकम् ।
कथितं शास्त्रयोगेन श्रुत्वा गोप्यं त्वयानघे ! ॥
गोपनात्सिद्धिदं ह्येतत्प्राकट्यान्न फलप्रदम् ॥ १२५ ॥

इति महापदप्रदायकं १३ यन्त्रम् ।

अथातः शृणु देवेशि मारणाख्यं परं त्विदम् ।
न कस्यचिन्मयाख्यातं यन्त्रं दुष्टभयप्रदम् ॥ १२६ ॥

**मारणं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

प्राणात्यये हि कर्त्तव्यं न क्षुद्राय कदाचन ।
प्राणानां हरणं यन्त्रं सदा गोप्यं मया कृतम् ॥ १२७ ॥

साम्प्रतं तव निर्वन्धाद्वक्ष्येहं यन्त्रनायकम् ।
वाजी वाजी तथा दंती मंत्री मंत्री ततःपरम् ॥ १२८ ॥

अनेकशः पुनर्दन्ती तुरगद्वयमेव च ।
यथानुक्रमयोगेन मध्यकोष्ठात्सुरेश्वरि ॥ १२९ ॥

साध्यसाधकयोर्वर्णान्वेदसंगुणितान्पुनः ।
त्रिवेदविहृतान् पश्चात् मध्यकोष्ठादितो लिखेत् ॥१३०॥

साध्यमत्र तु विज्ञेया नाम्ना धूमावती सती ।
पूर्वोक्तैरेव सद्द्रव्यैर्यन्त्रराजं समालिखेत् ॥ १३१ ॥

दुष्टानां धनिनां चैव द्रोहिणां द्रोहकारिणाम् ।
राज्यवृत्तिहराणां च राष्ट्रदेशाभिमानिनाम् ॥ १३२ ॥

क्रूराणां कठिनानां तु मारणं तु समुदाहृतम् ।
प्राणात्यये तु कर्त्तव्यं मारणार्थं प्रयोगकम् ॥ १३३ ॥

इदं मया दैत्यवधे पूर्वं सम्यक् प्रकीर्तितम् ।
अंधकस्य वधे ह्येतन्मया संधारितं पुरा ।।
तव स्नेहेन देवेशि प्रकटी क्रियते मया ।। १३४ ।।

इति मारणं यन्त्रम् १४ ।

अथ वक्ष्ये सुरेशानि दुष्टानां तु निवारणम् ।
यन्त्रराजं वरारोहे सकलाभीष्टदायकम् ।। १३५ ।।

दुष्टनाशनं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

तुरगस्तुरगोदंती मन्त्री मन्त्री ततः परम् ।
अनेकशः पुनर्मन्त्री घोटकश्चापि घोटकः ।। १३६ ।।

विलिखेत्परमेशानि नायकं यन्त्रनामिनाम् ।
साध्यसाधकयोर्वर्णान् विभज्य नवभिः पुनः ।। १३७ ।।

सप्तभिः सुसमागुण्य मध्यकोष्ठादिकं न्यसेत् ।
साध्यसाधकयोर्वर्णान् विभज्य नवभिः पुनः ।। १३८ ।।

पञ्चभिर्गुणितान्कृत्वा विलिखेद्देशिकोत्तमः ।
साध्यमत्र विजानीयाल्लघुश्यामा परा मता ।। १३९ ।।

पूर्वोक्तेन विधानेन चाष्टगंधेन संलिखेत् ।
धारयेद्दक्षिणे वाहौ कण्ठे वा मूर्दिघ्न विन्यसेत् ।।
सर्वदुष्टमुखस्तंभो नाशनं चारिणां भवेत् ।। १४० ।।

इदं यन्त्रं मया ख्यातं दुष्टनाशनमुत्तमम् ।
गोपनीयं त्वया भद्रे ! स्वयोनिरिव वसुव्रते ! ।। १४१ ।।

इति दुष्टनाशनं यन्त्रम् ।

मारीणां शमनं यन्त्रं संक्षेपात्ते ब्रवीम्यहम् ।
महामारीप्रशमनं सर्वारिष्टविनाशनम् ॥ १४२ ॥

मारीहरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

दमनं दृष्टिमुष्टीनां शमनं व्याधिभेषजम् ।
गन्धर्वोप्यथ गन्धर्वः पद्मी मन्त्रिद्वयं तथा ॥ १४३ ॥
पुनः पद्मो पुनर्मन्त्री गन्धर्वद्वयमेव च ।
क्रमशो भरयेदंकान्मध्यकोष्ठविभागतः ॥ १४४ ॥
साध्यसाधकयोर्वर्णान्दिशविभाजितान् ।
शेषांकभरणं कुर्याद्दैशिकः प्रोक्तमार्गतः ॥ १४५ ॥
साध्यमत्र महादेवि विचित्रा परमेश्वरी ।
पूर्वोक्तैः सुमनोभिश्च चन्दनैर्गन्धमेलितैः ॥ १४६ ॥
विलिखेद्यन्त्रराजं तु साधकः सुसमाहितः ।
कण्ठे वा वामबाहौ वा धारयेद्यन्त्रमुत्तमम् ॥ १४७ ॥
मारीभयं शमं याति महामारी भयं तथा ।
अकालमरणं नैव लभते देवि ! मानवः ॥ १४८ ॥
इदं यन्त्री महामारीशमनं समुदाहृतम् ।
गोपनीयं प्रयत्नेन कलौ कृतवतां शुभम् ॥
नासाध्यं यन्त्रराजेन विद्यते जगतीतले ॥ १४९ ॥

इति मारीहरं यन्त्रम् ।

अथातो दुर्घटं यन्त्रं वदिष्ये प्राणवल्लभे ! ।
अप्राप्तप्राप्तिकरणं मनोभिलषितप्रदम् ॥ १५० ॥
दूरस्थं वा समीपस्थं दुर्घटं सुघटं भवेत् ।
हयद्वयं गजश्चैको मन्त्री मन्त्री तथा गजः ॥
हयोऽश्वश्च क्रमेणैव पूरयेन्मध्यकोष्ठतः ॥ १५१ ॥

हस्तद्वयं गजश्चैको मन्त्रीचैव भवेन्मन्त्री ॥ १५२ ॥
साध्यसाधकयोर्वर्णान्द्विगुणान् दशविभाजितान् ।
मध्यादितः समालिख्य यन्त्रराजमनुत्तमम् ॥ १५३ ॥

दुर्घटं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

साध्यमत्र विजानीयाद्देवीं ज्वालां द्युमालिनीम् ।
पूर्वोक्तैरष्टगन्धैश्च विलिखेत्सुसमाहितः ॥ १५४ ॥

धारयेद्धरणी - मध्ये हस्तमात्रं विलेखिते ।
ज्ञायते सर्वसिद्धिश्च नात्र कार्या विचारणा ॥ १५५ ॥
इदं यन्त्रं समुद्दिष्टं दुर्घटं सुखदं त्विदम् ।
विजयप्रदमेतत्तु नानाकार्यकरं परम् ॥ १५६ ॥

इति दुर्घटं यन्त्रम् १७ ।

अथ दुःखहरं वक्ष्ये यन्त्रं मम मनोहरम् ।
नानादुःखहरं चैतत्सदा विभवदायकम् ॥ १५७ ॥

व्याधिदुःखं मनोदुःखं दुःखं स्त्रीजनितं तथा ।
द्रव्यदुःखं सुतादुःखं दुःखं ज्ञातिभवं परम् ॥ १५८ ॥
नाशमायाति देवेशि ! यन्त्रस्यास्य विधारणात् ।
हयश्चाशुरयो हस्ती मन्त्री मन्त्री ततः परम् ॥१५९ ॥

गजो हयो हयश्चैव मध्यकोष्ठादिकं न्यसेत् ।
साध्यसाधकयोर्वर्णान् रुद्रघ्नान् सविभाजितान् ॥१६०॥
शेषांकैः पूरणं कृत्वा मन्त्री गुरुविधानतः ।
साध्यमत्र विशालाक्षी देवी त्रिभुवनेश्वरी ॥ १६१ ॥

### दुःखहरं यन्त्रम्

पूर्वोक्तेनाष्टगन्धेन विलिखेद्यन्त्रनायकम् ।
धारयेदंगसंलग्नं सर्वदुःखहरं परम् ॥ १३२ ॥
इदं यन्त्रं मया भद्रे ! तव स्नेहात्पृथक्कृतम् ।
दुष्टाय भक्तिहीनाय न देयं वै त्वयानघे ॥ १६३ ॥

इति दुःखहरं यन्त्रम् ।

अथ यन्त्रं सिद्धिसंज्ञं प्रब्रवीमि शृणुष्व तत् ।
मुनीनां तपसायुक्तमनसां योगिनां तथा ॥ १६४ ॥
वैद्यकानां च शिल्पीनां दैवज्ञानां विमानिनाम् ।
सिद्धिदं ज्ञानदं चैतद्विधिपूर्वं निबोध तत् ॥ १६५ ॥

### सिद्धिकरं यन्त्रम्

अश्वमश्वं तथा नागं मन्त्रिणं मन्त्रिणं पुनः ।
नागं मन्त्रिणमेवं स्यात्तुरगं तुरगं पुनः ॥ १६६ ॥
यथानुक्रमयोगेन शास्त्रमार्गेण भामिनि ! ।
मध्यकोष्ठादितो लेख्यं यावदंकविसर्पणम् ॥ १६७ ॥

साध्यसाधकयोर्वर्णान् पक्षघ्नान् तिथिभाजितान् ।
विलिखेन्मध्यकोष्ठादि - क्रमेण सुरवन्दिते ॥१६८॥
साध्यमत्र तु विज्ञेया मातंगी परमा परा ।
अष्टगंधैस्तु पूर्वोक्तैर्मेलयित्वा लिखेदमुम् ॥ १६९ ॥
धारयेत्सततं मूर्ध्निधनतः सिद्धिमवाप्नुयात् ॥ १७० ॥
इदं यन्त्रं मया भद्रे ! भवतारणकारणम् ।
कथितं तव सान्निध्यप्रदं परमपावनम् ॥ १७१ ॥
गोप्यं गोप्यं त्वया भद्रे सिद्धार्थं सिद्धसेवितम् ॥ १७२ ॥

इति सिद्धिकरं यन्त्रम् ।

सारस्वतप्रदं यन्त्रं वक्ष्यामि शृणु साम्प्रतम् ।
वेदशास्त्रपुराणानि काव्यव्याकरणानि च ॥१७३॥
ज्यौतिषं भैषजं कर्म सर्वविद्योपयोगिकम् ।
विद्योपविद्यासंघानां ज्ञानानां च परं त्विदम् ॥ १७४ ॥

विद्याप्रदं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | २ |
| ७ | ५ | ९ |
| २ | ३ | ४ |

न कस्यचिन्नमयाख्यातं पृच्छतामपि भामिनि ।
साम्प्रतं कथ्यते देवि ! तवाग्रे यन्त्रनायकम् ॥ १७५ ॥
अश्वश्चैव हयश्चैव गजश्चैवं वरानने ।
मन्त्री मन्त्री चापि परं नागश्चापि हयद्वयम् ॥ १७६ ॥
क्रमेणानेन देवेशि ! विलिखेद्देशिकोत्तमः ।
साध्यसाधकयोर्वर्णान्नवघ्नान्सप्तभाजितान् ॥ १७७ ॥
पूरयेन्मध्यकोष्ठादिविधानेन नरोत्तमः ।
साध्यमत्र महाघोरा काली नामाद्य दैवतम् ॥ १७८ ॥

सुगंधैश्चाष्टगधैश्च पूरयित्वा विधानतः ।
प्रक्षाल्य जलमध्ये तु क्षालयित्वा पिबेन्नर ॥ १७६ ॥

मासात्कविर्भवेन्नूनं षण्मासात्पण्डितो भवेत् ।
वर्षात्सर्वविधानज्ञः सर्वविद्याविशारदः ॥ १८० ॥

मूर्खः पण्डिततां याति किं पुनः पण्डितो जनः ।
इदं यन्त्रं मया भद्रे ! गणेशाय समर्पितम् ॥ १८१ ॥

गुरवे गिरिजे दत्तं स विद्याविभवो भवत् ।
गोपनीयं गोपनीयं गोपनीयं परात्परम् ।
शिष्याणां हितकामाय मया प्रोक्तं वरानने ! ॥ १८३ ॥

इति विद्याप्रदं यन्त्रम् ।

अथ ते सम्प्रवक्ष्याभि यन्त्रं वनभयापहम् ।
न व्याघ्रपथिकक्षुद्रदस्युपर्वतजं भयम् ॥ १८४ ॥

भयं न जायते देवि ! मानसस्थं न संशयः ।
अश्वोऽश्वश्च राजो मन्त्री द्वयमतः परम् ॥ १८५ ॥

गजो मन्त्री तुरंगश्च हयेन परित. क्रमात् ।
पूरयेन्मध्यकोष्ठादि गणनाक्रमभेदतः ॥ १८६ ॥

**वनभयापहं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

साध्यसाधकयोर्वर्णान् रविभक्तान् शिवा हतान् ।
कोष्ठपंक्तेः प्रथमतो मध्यतो वै समा लिखेत् ॥१८७॥

साध्यमत्र विजानीयाद्देवी श्रीवनदुर्गिका ।
पूर्वोक्तैर्गन्धबहुलैः पदार्थैः संलिखेद्बुधः ॥ १८८ ॥

धारयेद्दक्षिणे बाहौ मुकुटे आथवा प्रिये ।
धारणाद्यन्त्रराजस्य भयं नैव प्रजायते ॥१८९॥

इदं यन्त्रं वरारोहे न गजोद्भूयनाशनम् ।
गोप्यं त्वया प्रयत्नेन देयं पुत्राय पार्वति ॥ १९० ॥

इति वनभयावहं यन्त्रमेकविंशम् ।

ॐ ऐं ऐं ऐं सरस्वतीं वाक्तत्त्वं स्फुरन्ति जिह्वाकण्ठे शारदाय नमः ॥

अथ वक्ष्ये महेशानि विषाशकरं परम् ।
यन्त्रं सम्प्रति ते वच्मि श्रुत्वा तदवधारय ॥ १९१ ॥

विषाणि नवभेदानि स्थावराणि चराणि च ।
लूताविषं सर्पविषं वृश्चिकस्यापि यद्विषम् ॥ १९२ ॥

**विषहरं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

व्याघ्रजं वृक्षजं चैव विषं नाशयते ध्रुवम् ।
हयो हयो गजो मन्त्री मन्त्री चैव तथा गजः ॥ १९३ ॥

हयो हयः क्रमादेतान् विलिखेन्मध्यकोष्ठतः ।
साध्यसाधकयोर्वर्णान्निवध्नान् पंचभाजितान् ॥ १९४ ॥

विलिखेन्मध्यतो देवि ! गुर्वाज्ञा लब्धमार्गतः ।
साध्यमत्र महेशानि ! ललिता परमेश्वरी ॥ १९५ ॥

अष्टगन्धैस्तु पूर्वोक्तैर्विलिख्य परमेश्वरि ।
धारयेद्यंत्रराजं तु विधिना साधकोत्तमः ॥ १९६ ॥

इदं यन्त्रं विषहरं नानाजातिसमुद्भवम् ।
हरते धारणाद्देवि ! सत्यं सत्यं न संशयः ॥ १९७ ॥

इति विषहरं यन्त्रम् ।

अथ कीटहरं वक्ष्ये नानाजंतु-निवारणम् ।
सिंहानां चित्रकाणां तु जरायूणां च विद्युताम् ॥ १ ॥
नागानां च विषोल्वानां नानालूतादिसंभवम् ।
शरभाच्च तथा कोलाद्भृश्चिकाच्च यदुद्गतम् ॥ २ ॥
सर्वं करटिसंभूतं भयं नश्यति तत्क्षणात् ।
हयश्चाश्वस्तथा नागो मन्त्री मन्त्री च भामिनि ॥ ३ ॥
नागश्चैको हयद्वन्द्वं मन्त्री पूर्वमतः परम् ।
मध्यकोष्ठादि संलिख्य यावदङ्कस्य पूरणम् ॥ ४ ॥
साध्यसाधकयोर्वर्णान्निरसहनान्सप्तभाजितान् ।
विलिखेत्परमेशानि गुरुदर्शितमार्गतः ॥ ५ ॥
साध्यमत्र महेशानि ! देवी नीलसरस्वती ।
पूर्वोक्तैरष्टगन्धैश्च विलिखेन्मन्दगामिनि ॥ ६ ॥
धारयेत्स्वभुजे देवि यथेच्छं विहरेद्वने ।
न भयं जायते क्वापि सर्वत्र समदर्शिनः ।
विचरेत्सकलां पृथ्वीं निर्भयो मानवोत्तमः ॥ ७ ॥
इदं यन्त्रं महेशानि ! कीटजन्यभयापहम् ।
गोपनीयं मनुष्येभ्यो वक्तव्यं प्रेयसे सदा ॥ ८ ॥

इति कीटभयहरं यन्त्रम् ।

अथ वक्ष्ये महेशानि यन्त्रं परमकारणम् ।
नानाकूटहरं यन्त्रं कूटकोद्गमनाशकम् ॥ ९ ॥

**कीटभयहरं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ९ |
| ७ | ५ | ३ |
| २ | ८ | ४ |

ज्ञातिकूटं मित्रकूटं शत्रुकूटं तथा प्रिये ।
स्त्रीकूटं देशकूटं च निवारयति यन्त्रराट् ॥ १० ॥

कूटं परकृतं कार्यं कर्मणा देहघातनम् ।
हरते यन्त्रराजोऽसौ नात्र कार्या विचारणा ॥ ११ ॥

सप्तियुग्मं गजश्चैको मन्त्रियुग्मं गजः प्रिये ।
सप्तिद्वयं च देवेशि ! मध्यकोष्ठक्रमेण तु ॥
विलिखेत्परमेशानि मम मार्गविचक्षणः ॥ १२ ॥

साध्यसाधकयोर्वर्णान्विभज्य रसपंचभिः ।
सप्तभिस्तु हरेद्भागं शेषं कोष्ठे प्रविन्यसेत् ॥ १३ ॥

साध्यमत्र महामाया सुमुखी सुमुखार्थदा ।
कोष्ठपंक्तेः प्रथमतो विलिखेत्सुखनन्दिते ॥ १४ ॥

पूर्वोक्तैरष्टगन्धैस्तु विलिख्य च शुभे दिने ।
धारयेद्दक्षिणे बाहौ मूर्ध्नि कण्ठेऽथ वा प्रिये ॥ १५ ॥

इदं यन्त्रं सुखदे मया भुवनरक्षया ।
धारितं धार्यते लोकैः सिद्धिकामार्थसिद्धये ॥ १६ ॥

इति कूटहरं यन्त्रम् ।

अथ वक्ष्ये महादेवि ! लूताविस्फोटनाशनम् ।
यन्त्रराजं सुरानन्दे अधुना प्रकृतं शृणु ॥ १७ ॥

लूताविषं प्राणहरं नाना व्याधिविधायकम् ।
असाध्यं तु महादेवि लूताविस्फोटसंज्ञकम् ॥ १८ ॥

**कुष्ठहरं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

द्विसप्तरसनन्देषु बाणभूवेदसंमिते ।
तृतीये चाष्टमे देवि ! विलिखेद्देशिकोत्तमः ॥ १९ ॥

साध्यसाधकयोर्वर्णान्संगुण्यरसपञ्चभिः ।
नंदाग्निना भाजयित्वा शेषं कोष्ठेषु संलिखेत् ॥ २० ॥

साध्यमत्र वरेशानि ! कुरुकुल्ला वराधिका ।
मध्यकोष्ठस्थपंक्तेस्तु विलिखेद्ज्ञानवान्नरः ॥ २१ ॥

## लूताविषहरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

पूर्वोक्तैरेव तैर्द्रव्यैर्विविच्य प्रतिपादितैः ।
लिखित्वा यन्त्रराजं तु धारयेत्कण्ठदेशतः ॥ २२ ॥

इदं यन्त्रं समुद्दिष्टं लूताविषहरं परम् ।
गोपनीयं प्रयत्नेन जननी जारवत्प्रिये ॥ २३ ॥

इति लूताविषहरं यन्त्रम् ।

ज्वरदाहहरं यन्त्रं नानोपद्रवनाशनम् ।
ऐकाहिकंद्व्याहिकं च त्र्याहिकं तु महाज्वरम् ॥ २४ ॥

चातुर्थिकं पांचमिकं मास्यं षाण्मासिकं तथा ।
वार्षिकं पित्तजं चैव कफजं वातजं प्रिये ॥ २५ ॥

सन्निपातं महाघोरं कृत्याराक्षसभूतजम् ।
ज्वरं नाशयते शीघ्रं यन्त्रराजः सुरेश्वरि ॥ २६ ॥

नेत्रेमुनौ रसे नंदे वाणे भुवि चतुर्थके ।
तृतीये चाष्टमे देवि विलिखेत्मध्यकोष्ठतः ॥ २७ ॥

साध्यसाधकयोर्वर्णान् त्रिघ्नान् पंचविभाजितान् ।
विलिखेत्परमेशानि पंक्तिकोष्ठविभेदतः ॥ २८ ॥

साध्यमत्र महेशानि भैरवी त्रिपुरसुन्दरी ।
उक्तक्रमेण गंधाद्यैर्विलिखेद्यन्त्रनायकम् ॥ २९ ॥

धारयेन्मणिबन्धे तु दक्षबाहौ वरानने ।
सर्वे ज्वराः पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥ ३० ॥

इदं यन्त्रं ज्वरहरं मया प्रोक्तं वरानने ।
उपकाराय लोकानां साधूनां च हिताय वै ॥ ३१ ॥

ज्वरहरं यन्त्रम्

| | | |
|---|---|---|
| ४ | ९ | २ |
| ३ | ५ | ७ |
| ८ | १ | ६ |

गोप्यं त्वया सदा भद्रे साधुभ्यो नैव गोपयेत् ॥ ३२ ॥

इति ज्वरहरं यन्त्रम् ।

कुष्ठरोगहरं यन्त्रं श्वैत्यकायकरांतकृत् ।
रूपहीनं नरं दृष्टा मच्चित्तमनुकंपितम् ॥ ३३ ॥
तदर्थं तु महायन्त्रं कल्पितं प्राणिनां हितम् ।
ब्रह्महत्यादिपापैस्तु जायते व्याधिसंभवः ॥ ३४ ॥
तन्नाशकं वरारोहे महायन्त्रमिमं शृणु ।
करे मुनौ रसे चैव नवमे पंचमे प्रिये ॥ ३५ ॥

कुष्ठहरं यन्त्रम्

| | | |
|---|---|---|
| ४ | ९ | २ |
| ३ | ५ | ७ |
| ८ | १ | ६ |

प्रथमे च चतुर्थे च तृतीये चाष्टमे प्रिये ! ।
कोष्ठस्य पंक्तिभेदेन विलिखेद् गुणोदितः ॥ ३६ ॥
साध्यसाधकयोर्वर्णान् वेदघ्नान् रसभाजितान् ।
शेषांकतः समारभ्य यन्त्रराजं लिखेत्सुधीः ॥ ३७ ॥

साध्यमत्र शुभे भद्रे विरजा नाम देवता ।
पूर्वोक्तैरेव सद्द्रव्यैर्लेखनीयं प्रयत्नतः ॥ ३८ ॥
धारयेद्वक्षसा देवि यत्र कुष्ठं भवेत्प्रिये ।
तत्क्षणान्नाशमायाति यन्त्रराजस्य धारणात् ॥ ३९ ॥
वक्तव्यं साधवे देवि ऋजवे दंभवर्जिते ।
दुष्टाय भक्तिहीनाय न वक्तव्यं कदापि च ॥ ४० ॥
इदं यन्त्रं मया प्रोक्तं सद्यः प्रत्ययकारकम् ॥ ४१ ॥

इति कुष्ठहरं यन्त्रम् ।

अथ चिन्ताहरं वक्ष्ये प्राणिनां धर्मशालिनाम् ।
धातुचिन्ता मूलचिन्ता चिन्ता या जीवसंभवा ॥ ४२ ॥
देशचिन्ता राज्यचिन्ता पुत्रचिन्ता तथा प्रिये ।
नाशयेद्यन्त्रराजस्तु नात्र कार्या विचारणा ॥ ४३ ॥
वाहुपर्वत - तर्केषु नवपंचादिमेषु च ।
तुर्यतृतीयकोष्ठे च वसुसंख्ये लिखेत्क्रमात् ॥ ४४ ॥
मध्यकोष्ठविभेदेन तत्र दृष्टेन वर्त्मना ।
साध्यमत्र महेशानि ! भवानी भवतारिणी ॥ ४५ ॥
साध्यसाधकयोर्वर्णान्दिशगुण्यान्विभाजितान् ।
त्रयोदशैः परेशानि शेषं कोष्ठे प्रविन्यसेत् ॥ ४६ ॥

चिन्ताहरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

अष्टगन्धैः पुरोद्दिष्टैर्विलेख्यं यन्त्रमुत्तमम् ।
धारयेद्धृदये देवि नानाचिन्ताहरं भवेत् ॥ ४७ ॥
गोपनीयं प्रयत्नेन सर्वथा वीरवन्दिते ।
नाभक्ताय प्रदातव्यं निंदकाय दुरात्मने ॥ ४८ ॥

इति ते कथितं यन्त्रं सर्वचिन्ताहरं परम् ।
मया धृतं महाकालि त्रिपुरासुरनाशिनि ॥ ४९ ॥

इति चिन्ताहरं यन्त्रम् ।

अथातः शृणु देवेशि ! यन्त्रं मोक्षकरं परम् ।
ऋषीणां तापसानान्तु मुनीनां योगिनां प्रिये ॥ ५० ॥

विरक्तानां गृहस्थानां धर्मशीलविलासिनाम् ।
हितार्थं कथ्यते यन्त्रराजमिमं शृणु ॥ ५१ ॥

भुजे शैले रसे नन्दे पंचमे प्रथमे बुधौ ।
वह्नौ गजे सुरेशानि विलिखेत्तन्त्रमार्गतः ॥ ५२ ॥

साध्यसाधकयं वर्णान् रसघ्नान्सप्तभाजितान् ।
मध्यकोष्ठविभेदेन विलिखेत्सुरवन्दिते ॥ ५३ ॥

मोक्षकरं यन्त्रम्

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

साध्यमत्र महारौद्रे वैष्णवी शक्तिरुत्तमा ।
पूर्वोक्तैरष्टगंधैश्च विलिखेत्सुरसाधिके ॥ ५४ ॥

धारयेद्ब्रह्मरन्ध्रे तु शिखायां वा मम प्रिये ।
धारणाद्यन्त्रराजस्य मुक्तो भवति मानवः ॥ ५५ ॥

इदं यन्त्रं मया प्रोक्तं यथार्थफलदं प्रिये ।
मार्कण्डेयाय निर्दिष्टं पूर्वं तच्चाधुना स्मृतम् ॥ ५६ ॥

गोपनीयं त्वया सम्यक् सर्वत्र श्रेयसोच्छया ।
स्वयं ज्ञेयं ज्ञानगम्यं यन्त्रराजं हितं मम ॥ ५७ ॥

इति मोक्षकरं यन्त्रम् ।

अथ सम्यक् शृणु प्राज्ञे यन्त्रं मन्त्रमयं परम् ।
वन्दिमोक्षकरं यन्त्रं प्राणिनां हितकारकम् ॥ ५८ ॥
राजद्वारगतानां तु वन्दिनां चौर्यकारिणाम् ।
परस्त्रीधर्षकाणां तु परद्रव्यापहारिणाम् ॥ ५९ ॥
हितकारिमहायन्त्रं सुखकीर्त्तिकरं परम् ।
शये मुनौ रसे चांके पंचमे प्रथमे प्रिये ॥ ६० ॥
चतुर्थे च तृतीये च गजसंख्ये लिखेत्सुधीः ।
साध्यसाधकयोर्वर्णान् गजघ्नान् रुद्रभाजितान् ॥ ६१ ॥
विलिखेन्मध्यकोष्ठादि पंक्तिकोष्ठस्य भेदतः ।
साध्यमत्र महेशानि चामुण्डा वरवाहिनी ॥ ६२ ॥
पूर्वोदितैश्च तैर्द्रव्यैर्यथास्वं परिकल्पितैः ।
लिखित्वा धारयेद्यन्त्रं वन्दी मुक्तो भवेन्नरः ॥ ६३ ॥

**वन्दिमोक्षकरं यन्त्रम्**

| | | |
|---|---|---|
| ६ | १ | ८ |
| ७ | ५ | ३ |
| २ | ९ | ४ |

देयं शान्ताय दीनाय दयादानपराय च ।
राज्ञे च सखिने देयं यन्त्रराजं सदानघे ॥ ६४ ॥
न देयं निन्दकायापि कृतघ्नायानसूयवे ।
इति ते कथितं भद्रे यन्त्रराजं मनोहरम् ॥ ६५ ॥
वंदिमुक्तिकरं ह्येतद्रावणायार्पितं पुरा ।
वंदिशालां गतायापि सहस्रार्जुनमन्दिरे ॥ ६६ ॥
इदं गोप्यं पुण्यकरं दुःखदं तु प्रकाशितम् ॥ ६७ ॥

इति वंदिमोक्षकरं त्रिंशं यन्त्रम् ॥

इतिश्रीशिवताण्डवतन्त्रे दक्षिणामूर्त्तिपार्वतीसंवादे ।
नवकोष्ठयन्त्रकथनो नाम त्रयोदशः पटलः ॥

श्रीदक्षिणामूर्त्तिरुवाच—

कोष्ठषोडशकानां तु शृणु भद्रे परां क्रियाम् ।
क्रियते विबुधैर्या हितं समाधानतः परम् ॥ १ ॥

कथयिष्ये वरारोहे ! महाप्रत्ययकारकम् ।
विशेषतः कलियुगे गोप्तव्यं सर्वथांबिके ॥ २ ॥

दारिद्र्यशमनं यन्त्रं दुःखिनां प्रीतिकारकम् ।
श्रियो विप्रलतामिच्छन् साधयेद्यंत्रनायकम् ॥ ३ ॥

निधिदं रत्नदं चैव स्वर्णदं रौप्यदं प्रिये ।
देयं नासाधवे भद्रे सदा भद्रविधायकम् ॥ ४ ॥

आदौ षोडशकोष्ठानि कृत्वा साधकसत्तमः ।
साध्यसाधकयोर्वर्णानेकीकृत्य विधानवित् ॥ ५ ॥

अर्द्धीकृत्य ततो भद्रे विषमे सार्द्धहीनकम् ।
समादेकेन वा शून्यं कर्त्तव्यं तन्त्रचोदितम् ॥ ६ ॥

ज्ञानं शिवपदे ज्ञानं ज्ञानं गोप्तुः सुराननम् ।
शेषांकमर्द्धविषमं गुप्तसारशिवापदैः ॥ ७ ॥

अनेन विधिना देवि ! पूरणीयं प्रयत्नतः ।
साध्यमत्र वरारोहे ! त्रिपुराभुवनेश्वरी ॥ ८ ॥

दारिद्र्यशमनं यन्त्रम्

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

| | | | |
|---|---|---|---|
| ४ | ३ | ० | ० |
| ० | ० | २ | १ |
| ५ | ६ | ० | ० |
| ० | ० | ७ | ८ |

मध्यकोष्ठविभेदेन पूर्वोक्तैश्चाष्टगन्धकैः ।
पूर्वोक्तमातृकावर्णानां लेखनं कारयेत्क्रमात् ॥ ९ ॥

कण्ठे वा दक्षिणे बाहौ धारयेद्यन्त्रनायकम् ।
दरिद्रो लभते सौख्यं धनं निधिसमाकुलम् ॥ १० ॥

इति ते कथितं सौम्ये महादारिद्र्यनाशनम् ।
यन्त्रवर्यं मया प्रोक्तं गोपनीयं विशेषतः ॥ ११ ॥

इति दारिद्र्यशमनं यन्त्रम् ।

अतः परं प्रवक्ष्यामि यन्त्रं विद्वेषणं परम् ।
साधकानां हितार्थाय कथयिष्ये तवाग्रतः ॥ १२ ॥
द्वेषिणां राज्यहर्त्तॄणां तथा ग्रामापहारिणाम् ।
वृत्तिवर्तनकर्तॄणां तथा पैशून्यशालिनाम् ॥ १३ ॥
महामात्यं वशीकर्त्तुं राज्ञो जनविलोडनम् ।
युवत्योः प्रेमसंगार्थं तथा त्रयविकारिणाम् ॥ १४ ॥
सर्वस्वहारिणां भद्रे विद्वेषकरणं मतम् ।
शून्यं शून्यं वाणवेदाश्चन्द्राष्टौ शून्यरन्ध्रकम् ॥ १५ ॥
रन्ध्रं रोकं वह्निशास्त्रे स्वरपक्षौद्विशून्यकम् ।
साध्यसाधकयोर्वर्णानेकीकृत्य विधानवित् ॥ १६ ॥
अर्द्धीकृतं प्रथमतस्त्रितर्कमुनिवाहुषु ।
बाणतुर्येन्दुनागेषु शेषं संमेलयेद् बुधः ॥ १७ ॥
साध्यमत्र प्रिये देवि तुलजापरमेश्वरी ।
आद्यकोष्ठविभागेन पूर्वोक्तैश्चाष्टगन्धकैः ॥ १८ ॥

विद्वेषणं यन्त्रम्

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

विलिख्य यन्त्रराजं तु कण्ठे वा मूर्ध्नि धारयेत् ।
धारणाद्द्विषतां द्वेषो भवत्येव परस्परम् ॥ १९ ॥
इदं यन्त्रं द्वेषणकं कथितं तव सन्निधौ ।
गोपनीयं त्वया भद्रे ! स्वयोनिरिव सुन्दरि ॥ २० ॥

इति विद्वेषणं यन्त्रम् ।

वन्ध्यापुत्रप्रदं यन्त्रं तवाग्रे तु मया स्मृतम् ।
शृणुतं संप्रवक्ष्यामि यन्त्रराजं मनोहरम् ॥ २१ ॥
नारीणां हि महद्दुःखं वन्ध्याशब्देनवाचितम् ।
तद्दुःखं हरते देवि यन्त्रराजो मया स्मृतः ॥ २२ ॥
तुर्यकोष्ठे स्वगत्या च तिथौ च स्वगतिं लिखेत् ।
द्विःसप्तेरपगत्या च वाजिगत्या खरात्मके ॥ २३ ॥

मन्त्रिगत्याश्वगत्या च प्रथमं पूरयेत्सुधीः ।
तदंकाद्गजगत्या च नागकोष्ठानि पूरयेत् ॥ २४ ॥
सर्वतो न्यूनमंकेन विपरीतं समाश्रयेत् ।
साध्यसाधकयोर्वर्णानेकीकृत्य विशेषतः ॥ २५ ॥

वन्ध्यापुत्रप्रदम्

| | | | |
|---|---|---|---|
| १६ | ३ | १३ | २ |
| ९ | ६ | १२ | ७ |
| ४ | १४ | १ | १४ |
| ४ | १० | ८ | ११ |

प. वन्ध्यापुत्रप्रदम्

| | | | |
|---|---|---|---|
| ८ | १ | १४ | ११ |
| १३ | १२ | २ | ७ |
| ३ | ६ | ९ | १६ |
| १५ | १० | ४ | ५ |

प. वन्ध्यापुत्रप्रदम्

| | | | |
|---|---|---|---|
| १४ | ११ | ८ | १ |
| ७ | २ | १३ | १२ |
| ९ | १६ | ३ | ६ |
| ४ | ५ | १० | १५ |

अर्द्धीकृत्य च पूर्वोक्तविधानेन लिखेत्सुधी ।
साध्यमत्र वरारोहे ! नित्य विलन्ना परात्परा ॥ २६ ॥
पूर्वोक्तैरेव तद्द्रव्यैर्यन्त्रराजं समालिखेत् ।
धारयेदुत्तरे कट्यां योषितो गर्भधारणात् ॥ २७ ॥
यावदुत्पाद्यते जन्तुस्तावद्यन्त्रं तु धारयेत् ।
पश्चाच्छिशोः कंठदेशे वन्धनीयं प्रयत्नतः ॥ २८ ॥
इदं यन्त्रं धर्मकाममोक्षद्रव्यैकसाधनम् ।
संतानं लभते वन्ध्या सत्यं सत्यं वचो मम ॥ २९ ॥

इति वन्ध्यापुत्रप्रदं यन्त्रम् ।

क्षत्रमर्दननामानं यन्त्रं वक्ष्ये तवाग्रतः ।
महायुद्धे घोरयुद्धे कूटयुद्धे भयापहम् ॥ ३० ॥

पुरा परशुरामेण शिक्षितं यन्त्रमुत्तमम् ।
ततो वैरेण तेनैव क्षत्रं दग्धं मनोहरं ॥ ३१ ॥

नाना-रस-तुला नाना नाना जयवशानना ।
इष्टार्द्धयूनितं तद्वद्गजगत्या ततो लिखेत् ॥ ३२ ॥

**क्षत्रमर्दनं यन्त्रम्**

| | | | |
|---|---|---|---|
| ८ | १ | २ | ७ |
| ६ | ३ | ४ | ५ |
| २ | ७ | ८ | १ |
| ४ | ५ | ६ | ३ |

**क्षत्रमर्दन यन्त्रम्**

| | | | |
|---|---|---|---|
| ६ | १५ | १ | १२ |
| ३ | १० | ८ | १३ |
| १६ | ५ | ११ | २ |
| ९ | ४ | १४ | ७ |

**क्षत्रमर्दनं यन्त्रम्**

| | | | |
|---|---|---|---|
| १२ | १ | १५ | ६ |
| १३ | ८ | १० | ३ |
| २ | ११ | ५ | १६ |
| ७ | १४ | ४ | ९ |

साध्यसाधकयोर्वर्णानेकीकृत्य ततः परम् ।
पूर्वोक्तविधिना लेख्यं वह्निकोष्ठविभेदतः ॥ ३३ ॥
साध्यमत्र महेशानि ! कामाक्षी परमेश्वरी ।
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेत्साधकोत्तमः ॥ ३४ ॥
धारयेद्दुंदुभे वीरे जयो भवति निश्चितम् ॥ ३५ ॥
इदं यन्त्रं मया प्रोक्तं सर्वक्षत्रविमर्दनम् ।
गोपनीयं गोपनीयं गोपनीयं मम प्रिये ॥ ३६ ॥

इति क्षत्रमर्दनं यन्त्रम् ।

कन्याप्रदं महायन्त्रं शृणु पार्वति साम्प्रतम् ।
वसुमान्सुभगां कन्यां विवाहयितुमिच्छति ॥ ३७ ॥

**कन्याप्रदं यन्त्रम्**

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

तदर्थं यन्त्रराजस्ते कथ्यतेऽद्भुतकारणम् ।
रन्ध्रं रन्ध्रे कुद्वितीये तृतीये बाणसंमितम् ॥ ३८ ॥

चतुर्थे कोष्ठसंख्यातं पंचमे चन्द्रसंमितम् ।
षष्ठे नागमितं चांकं सप्तमाष्टमरन्ध्रकम् ॥ ३९ ॥
नवमे दशमे रन्ध्रं शिवेग्निर्द्वादशे रसः ।
त्रिंशे मुनिमितं लेख्यं भुवनेनेत्रसंमितम् ॥ ४० ॥
तिथौ विकारे रन्ध्रं तु विलिख्य परमार्थवित् ।
साध्यसाधकयोर्वर्णनिकीकृत्य दलौ कुरु ॥ ४१ ॥
विलिख्य परमेशानि ! गुप्तसारशिवापदैः ।
साध्यमत्र सुरेशानि कौमारी परमेश्वरी ॥ ४२ ॥
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य धारयेत्सुधीः ।
ध्वजोपरि तु संधार्यं मनोज्ञां लभते स्त्रियम् ॥ ४३ ॥
इति ते हि समाख्यातं यन्त्रं कन्याप्रदं शिवे ।
नाभक्ताय प्रदातव्यं दयं भक्तेस्य एव च । ४४ ॥

इति कन्याप्रदं यन्त्रम् ।

स्वामिवश्यकरं यन्त्रं प्रवक्ष्यामि समासतः ।
स्वामी प्रभुः स्त्रियो भर्ता पालको जनकः पिता ॥ ४५ ॥
ते सर्वे वशमायान्ति यन्त्रराजस्य लेखनात् ।
षष्ठ तुर्ये तिथौ चांके वह्नौ बाणे दिशाभिधे ॥ ४६ ॥
षोडशे विश्वसंख्याते रुद्रेण गोक्षिसंमिते ।
सूर्ये मनौ तथा चाद्ये सप्तमे च क्रमाल्लिखेत् ॥ ४७ ॥

**स्वामिवश्यकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १५ | १२ | ५ | २ |
| ६ | १ | १६ | ११ |
| ४ | ७ | १० | १३ |
| ९ | १४ | ३ | ८ |

साध्यसाधकयोर्वर्णनिकीकृत्य विधानवित् ।
अर्द्धीकृत्य समायोज्यं पूर्वकोष्ठविभेदतः ॥ ४८ ॥

साध्यमत्र महेशानि कौशिकी परमेश्वरी ।
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेद्यन्त्रनायकम् ॥ ४९ ॥

धारयेद्बाहुयुग्मेन दक्षे वामे पुमान्स्त्रियः ।
धारणाद्यन्त्रराजस्य स्वामी वश्यतरो भवेत् ॥ ५० ॥

इदं यन्त्रं स्वामिवश्यकारकं समुदाहृतम् ।
गोपनीयं प्रयत्नेन नान्यथा मम भाषितम् ॥ ५१ ॥

इति स्वामिवश्यकरं यन्त्रम् ।

परयुद्धहरं यन्त्रं शृणु मत्तो वरानने ।
मनौ सूर्ये सप्तमे च प्रथमे रुद्रसंमिते ॥ ५२ ॥

त्रयोदशे तथा नेत्रे अष्टमे पंचमेऽपि च ।
तृतीये षोडशे पंक्तौ वेदे तर्के नवे तिथौ ॥ ५३ ॥

साध्यसाधकयोर्वर्णानिकीकृत्य दलीकृतान् ।
मनुकोष्ठाद्यतोलेख्यं पूर्व-पूर्वविभागतः ॥ ५४ ॥

**युद्धजयकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ४ | ७ | १० | १३ |
| ९ | १४ | ३ | ८ |
| १५ | १२ | ५ | २ |
| ६ | १ | १६ | ११ |

साध्यमत्र महेशानि भ्रामरी कुलिशात्मिका ।
पूर्वोक्तैरेव तैर्द्रव्यैर्लिखित्वा यन्त्रनायकम् ॥ ५५ ॥

धारयेत्स्वपताकायां परयुद्धनिवारणम् ।
पलायते महासैन्यं चतुरंगबलान्वितम् ॥ ५६ ॥

इदं ते कथितं यन्त्रं परयुद्धजयावहम् ।
पुत्राय भक्तियुक्ताय देयं नान्याय सुन्दरि ॥ ५७ ॥

इति युद्धजयकरं यन्त्रम् ।

अतः परं वरारोहे यन्त्रं गजभयापहम् ।
तवाग्रे कथयिष्यामि प्रथमं कल्पतः शृणु ॥ ५८ ॥

सप्तमे प्रथमे देवि मनौ सूर्येक्षि सभिते ।
नागे रुद्रे विश्वसंख्ये षोडशे दशमे तथा ॥ ५९ ॥

बाणे वह्नौ चांकमिते तिथौ तुर्ये रसे सुधीः ।
साध्यसाधकयोर्वर्णान् एकीकृत्य दलीकृतान् ॥ ६० ॥

गजभयहरं यन्त्रम्

| | | | |
|---|---|---|---|
| २ | ५ | १२ | १५ |
| ११ | १६ | १ | ६ |
| १३ | १० | ७ | ४ |
| ८ | ३ | १४ | ९ |

सप्तकोष्ठात्समारभ्य पूर्वपूर्वविभेदतः ।
विलिखेद्यन्त्रराजं तु पूर्वोक्तैरष्टगन्धकैः ॥ ६१ ॥

धारयेत्सन्मुखे तस्य गजस्य परमेश्वरि ।
दर्शनात्स्पर्शनात्तस्य विमदो जायते गजः ॥ ६२ ॥

पलायतेऽथवा देवि विद्रुतो नैव लभ्यते ॥ ६३ ॥

इदं यन्त्रं समाख्यातं राज्ञां हितकरं मतम् ।
वनारण्यनिवासानां हितं परमुदाहृतम् ॥ ६४ ॥

इति गजभयहरं यन्त्रम् ।

कृत्याभयहरं यन्त्रं साम्प्रतं वच्मि सुन्दरि ।
येन विज्ञातमात्रेण डाकिनी नैव बाधते ॥ ६५ ॥

षोडशे दशमे बाणे वह्नौ नेत्रेष्टमे पुनः ।
शिवे विश्वे ततः पश्चान्नागगत्याग्रपूरणम् ॥ ६६ ॥

अंकानां तु विलोमेन विलिखेत्पूर्वपूर्वतः ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ ६७ ॥

हीनांकतो न्यूनमंकं पूर्वोक्तविधिना लिखेत् ।
साध्यमत्र महेशानि ! देवी शाकम्भरी परा ॥ ६८ ॥

**कृत्याभयहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १० | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |

पूर्वोक्तैरेव तैर्द्रव्यैर्लिखित्वा धारयेद्गले ।
कृत्याभयं न भवति यन्त्रराजस्य धारणात् ॥ ६९ ॥

इति ते हि मया ख्यातं यन्त्रं कृत्याभयापहम् ।
गोपनीयं पशुभ्यो हि देयं भक्तेभ्य एव हि ॥ ७० ॥

इति कृत्याभयहरं यन्त्रम् ।

अथ वक्ष्ये परं यन्त्रं महाग्रहभयापहम् ।
ग्रहाणां विमुख्याना बाधा नैव प्रजायते ॥ ७१ ॥

तमहं संप्रवक्ष्यामि यन्त्रराजं सुविस्तरात् ।
नानारसतुलानाना नानाजयवशानना ॥ ७२ ॥

**नवग्रहभयहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ३ | ६ | २ | ७ |
| ६ | ३ | ७ | २ |
| ५ | ४ | ८ | १ |
| ४ | ५ | १ | ८ |

इष्टार्द्धयूनितं तेषु गुप्तसारशिवापदैः ।
साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ॥ ७३ ॥

विलिखेत्पूर्वपूर्वाच्च यथाज्ञानं विशालधीः ।
साध्यमत्र महादेवि ! चण्डिका परमेश्वरी ॥ ७४ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेद्धारयेत्ततः ।
कण्ठे वा मूर्ध्नि वा बाहौ वा दक्षे बाधा प्रशाम्यति ॥ ७५ ॥

इदं यन्त्रं महाप्राज्ञे ! तवाग्रे प्रकटीकृतम् ।
न देयं यस्य कस्यापि देयं शिष्येभ्य एव च ॥ ७६ ॥

इति नवग्रहभयहरं यन्त्रम् ।

उच्चाटनकरं यन्त्रं दुष्टोच्चाटाय कीर्त्तितम् ।
तं शृणुष्व महाप्राज्ञे ! यथावत्कथयामि ते ॥ ७७ ॥

प्रथमे तुर्यकोष्ठे च षष्ठे चैव तु सप्तमे ।
दशमे रुद्रकोष्ठे च विश्वाख्ये षोडशे पुनः ॥ ७८ ॥

**उच्चाटनकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १ | १६ | १५ | २ |
| १४ | ३ | ४ | १३ |
| १२ | ५ | ६ | ११ |
| ७ | १० | ९ | ८ |

षोडशाच्च विलोमेन शेषकोष्ठेषु-संल्लिखेत् ।
पूरयेदनया रीत्या यथा कोष्ठांक-संमितम् ॥ ७९ ॥

साध्यसाधकयोर्वर्णनिकीकृत्य विभाजितान् ।
अर्द्धीकृत्याद्यतो लेख्यं यन्त्रं तन्त्रविदुत्तमैः ॥ ८० ॥

साध्यमत्र महेशानि ! देवी कमलवासिनी ।
पूर्वोक्तैश्चाष्टगंधैश्च विलिखेद्यन्त्रमुत्तमम् ॥ ८१ ॥

धारयेत्कण्ठगं प्राज्ञः सर्वोच्चाटकरं परम् ।
उच्चाटनकरं यन्त्रमिदं ते कथितं मया ॥ ८२ ॥

गोपनीयं गोपनीयं गोपनीयं त्वया शिवे ।
दुष्टेभ्यः कथितं यन्त्रं दुःखदौर्भाग्यदायकम् ॥ ८३ ॥

इत्युच्चाटनकरं यन्त्रम् ।

शत्रुपीडाकरं यन्त्रमिदानीं शृणु पार्वति ।
प्रथमे च तिथौ भद्रे मनौ वेदे च भास्करे ॥ ८४ ॥
रसे मुनौ नवाख्येन नागे दिक्षु शिवात्मिके ।
पंचमे विश्वकोष्ठे च वह्नौ पक्षमितेतिमे ॥ ८५ ॥
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखेद्यन्त्रकोष्ठे तु पूर्वपूर्वविभागतः ॥ ८६ ॥

ज्वरकरं यन्त्रम्

| | | | |
|---|---|---|---|
| १ | १५ | १४ | ४ |
| १२ | ६ | ७ | ९ |
| ८ | १० | ११ | ५ |
| १३ | ३ | २ | १६ |

छर्दिकरं यन्त्रम्

| | | | |
|---|---|---|---|
| १३ | ८ | १२ | १ |
| ३ | १० | ६ | १५ |
| २ | ११ | ७ | १४ |
| १६ | ५ | ९ | ७ |

शिरःपीडाकरं यन्त्रम्

| | | | |
|---|---|---|---|
| १६ | २ | ३ | १३ |
| ५ | ११ | १० | ८ |
| ९ | ७ | ६ | १२ |
| १४ | १० | १५ | १ |

साध्यमत्र महेशानि वनदुर्गाप्रकीर्तिता ।
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेद्विधिना प्रिये ॥ ८७ ॥
शत्रुगेहस्य देहल्यां यन्त्रं तत्र निखापयेत् ।
अथवा वामके बाहौ स्वके तुषि निधापयेत् ॥ ८८ ॥
धारणाद्यन्त्रराजस्य शत्रोः पीडा प्रजायते ।
ज्वरद्दर्दिशिरोगार्त्ति गुह्यपीडा महाभयम् ॥
जायते नात्र संदेहः सत्यं सत्यं वचो मम ॥ ८९ ॥
इदं यन्त्रं शत्रुपीडाकारकं कथितं मया ।
गोपनीयं त्वया भद्रे ! देयं सर्वस्वदायिने ॥ ९० ॥

इति शत्रुपीडाकरं यन्त्रम् ।

अथ वक्ष्ये परं यन्त्र जराहरणसंज्ञितम् ।
यस्य विज्ञानमात्रेण जरापलितवर्जितः ॥ ९१ ॥

गुह्यपीडाकरं यन्त्रम्

| | | | |
|---|---|---|---|
| ४ | ९ | ५ | १६ |
| १४ | ७ | ११ | २ |
| १५ | ६ | १० | ३ |
| १ | १२ | ८ | १३ |

ज्वरापहरणं यन्त्रम्

| | | | |
|---|---|---|---|
| ८ | १ | २ | ७ |
| ६ | ३ | ४ | ५ |
| २ | ७ | ८ | १ |
| ४ | ५ | ९ | ३ |

रन्ध्रं रन्ध्रं रस तुला रन्ध्रं रन्ध्रं पुनस्तथा ।
जाया च वशसंख्याता रन्ध्रं रन्ध्रं भवेत्प्रिये ॥ ९२ ॥

साध्यसाधकवर्णानिकोकृत्य दलीकृतान् ।
नागगत्या लिखेद्देवि ! पूर्वपूर्वविलोमतः ॥ ९३ ॥

रन्ध्रसंज्ञेषु कोष्ठेषु गुप्तसारशिवापदैः ।
साध्यमत्र महेशानि ! ललिता परमेश्वरी ॥ ९४ ॥

विलिख्य यन्त्रराजं तु पूर्वोक्तैश्चाष्टगन्धकैः ।
धारयेच्च शिखामध्ये कूर्चदेशेथवा प्रिये ॥ ९५ ॥

धारणाद्यन्त्रराजस्य शरीरं दार्ढ्यतामियात् ।
आकाशसदृशाः केशा जायन्ते भ्रमरोपमाः ॥ ९६ ॥

इद यन्त्रं वरारोहे मया तुभ्यं निवेदितम् ।
गोपनीयं त्वया देवि दातव्यं स्वप्रियाय वै ॥ ९७ ॥

इति जराहरणं यन्त्रं त्रयोदशम् ।

अथ वक्ष्ये महेशानि ! महाबलकरं परम् ।
यन्त्रराजं च यद् ज्ञात्वा नैर्बल्यं नैव जायते ॥ ९८ ॥

रोकं रोकं रस तुला रोकं रोकं पुनस्तथा ।
जपाश्च वशसंख्याता रोकं रोकं भवेत्प्रिये ॥ ९९ ॥

साध्यसाधकयोर्वर्णानिकोकृत्यदलीकृतान् ।
नागगत्या लिखेद् देवि पूर्वपूर्वविलोमतः ॥ १०० ॥

**बलकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ८ | १ | २ | ७ |
| ६ | ३ | ४ | ५ |
| २ | ७ | ८ | १ |
| ४ | ५ | ६ | ३ |

**सर्वरोगहरम्**

| | | | |
|---|---|---|---|
| १ | १५ | १४ | ४ |
| १२ | ६ | ७ | ९ |
| ८ | १० | ११ | ५ |
| १३ | ३ | २ | १६ |

**छर्दिहरम्**

| | | | |
|---|---|---|---|
| १३ | ८ | १२ | १ |
| ३ | १० | ६ | १५ |
| २ | ११ | ७ | १४ |
| १६ | ५ | ९ | ४ |

**शिरःपीडाहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १६ | २ | ३ | १३ |
| ५ | ११ | १० | ८ |
| ९ | ७ | ६ | १२ |
| ४ | १४ | १५ | १ |

रोकसंख्येषु कोष्ठेषु गुप्तसारशिवापदैः ।
साध्यमत्र महेशानि ! विज्ञेया लविका परा ॥ १०१ ॥

विलिख्य यन्त्रराजं तु पूर्वोक्तैश्चाष्टगन्धकैः ।
जायते बलवान्सोऽयं देहगं धारयन्सदा ॥ १०२ ॥

नवनागसहस्राणां बलं भवति तस्य हि ।
अजेयः सर्वसत्त्वानां यूनां बलवतां प्रिये ॥ १०३ ॥
युद्धे जयो भवत्येव यन्त्रराजस्य धारणात् ॥ १०४ ॥
इदं ते कथितं भद्रे महाबलकरं परम् ।
यन्त्रं सर्वार्थकरणं गोपनीयं त्वयानघे ॥ १०५ ॥

इति बलकरं यन्त्रं चतुर्दशम् ।

महागदहरं यन्त्रं शृणुष्वावहिता प्रिये ।
अष्टौ महागदाश्चान्ये नाशमायान्ति तत्क्षणात् ॥ १०६ ॥
प्रथमे च तिथौ शक्रे वेदेर्के रससंज्ञिते ।
स्वरे चांके वसौ पंक्तौ रुद्रे बाणे त्रयोदशे ॥ १०७ ॥
वह्नौ पक्षे लिखेदन्त्ये साधकः सिद्धिहेतवे ।
साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ॥ १०८ ॥

**गुह्यपीडाहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ४ | ९ | ५ | १६ |
| १४ | ७ | ११ | २ |
| १५ | ६ | १० | ३ |
| १ | १२ | ८ | १३ |

विलिखेत्क्रमशो देवि पूर्वपूर्वविभेदतः ।
साध्यमत्र महेशानि विज्ञेया बालसुन्दरी ॥ १०९ ॥
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य यन्त्रनायकम् ।
धारयेत्कण्ठगं तावद्यावद्रोगविनाशनम् ॥ ११० ॥
धारणाच्चास्य यन्त्रस्य रोगा यान्ति दिशो दश ।
इदं यन्त्रं गदहरं मया ते प्रतिकीर्त्तितम् ॥ १११ ॥
गोपनीयं तु दुष्टेभ्यो ह्यदुष्टेभ्यो न चैव हि ॥ ११२ ॥

इति गदहरं यन्त्रं पंचदशम् ।

अथ शूलहरं वक्ष्ये यन्त्रं शूलभयापहम् ।
वातशूलं पित्तशूलं कफशूलं तथा प्रिये ॥ ११३ ॥

मुष्कशूलं गुल्मशूल हृच्छूलं चापि यत्प्रिये ।
तत्सर्वं नाशमायाति यन्त्रराजस्य धारणात् ॥ ११४ ॥

नमो नभः शिव पदे वियत् वंच नभो नभः ।
गोप्तुः सुरा नमः रवं च विलिखेत्क्रमशः पुनः ॥ ११५ ॥

**शूलहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |

इष्टार्द्धमूनितं तेषु गुप्तसारशिवापदैः ।
साध्यसाधयोर्वर्णनिकोकृत्य दलीकृतान् ॥ ११६ ॥

विलिखेत्पूर्वपूर्वाच्च मध्यकोष्ठविभेदतः ।
साध्यमत्र महेशानि ! विज्ञेया श्यामला शुभा ॥ ११७ ॥

पूर्वोक्तैश्चाष्टगंधैश्च विलिख्य सुरसुन्दरी ।
धारयेदुदरे तद्धि ततः शूलाद्विमुच्यते ॥ ११८ ॥

इदं यन्त्रं शूलहरं मया ते कथित प्रिये ।
परोपकाराय पुनस्त्वया गोप्यं सदैव हि ॥ ११९ ॥

इति शूलहरं यन्त्रम् १६ ।

अथ स्त्र्याकरणं यन्त्रं सर्वार्थपरिपूरकम् ।
तदहं संप्रवक्ष्यामि शृणु देवि यथातथम् ॥ १२० ॥

सुन्दरीणां भामिनोनां तथा च परदेशिनाम् ।
दूरस्थानां महेशानि ! स्त्रीणामाकर्षणं परम् ॥ १२१ ॥

नभोनभः शिवपदे वियत् खं च नभो नभः ।
गोसुः सुरा नभः खं च विलिखेत्क्रमशः पुमान् ॥ १२२ ॥

इष्टार्द्धयूनितं तेषु गुप्तसारशिवापदैः ।
साध्यसाधकयोर्वर्णनिकोकृत्य दलोकृता ॥ ने१२३ ॥

विलिखेत्पूर्वपूर्वाच्च मध्यकोष्ठविभेदतः ।
साध्यमत्र महेशानि ! विज्ञेया नारसिंहिका ॥ १२४ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेत्साधकोत्तमः ।
धारयेत्कण्ठदेशे तु स्त्रियमाकर्षति क्षणात् ॥ १२५ ॥

**आकर्षणं यन्त्रम्**

| | | | |
|---|---|---|---|
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |

इदं यन्त्रं सुरेशानि सर्वाकर्षणकारकम् ।
आकर्षयत्यंबुनिधेः सुमेरोश्च दिगन्ततः ॥ १२६ ॥

पातालादिन्द्रलोकादेर्हेमस्त्रीशैलमूरुहान् ।
गोपनीयं प्रयत्नेन मम वाक्यं शुभं त्विदम् ॥ १२७ ॥

इत्याकर्षणं यन्त्रं सप्तदशम् ।

अथ वक्ष्ये महेशानि यन्त्रं सर्वार्थसाधनम् ।
पशुरक्षाकरं ह्येतत्सर्वारिष्टविनाशनम् ॥ १२८ ॥

वियन्नभः शिवपदे नभः खं च नभो वियत् ।
गोप्तुः सुरवियत् खं च विलिखेत्क्रमशः सुधीः ॥ १२९ ॥

साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
इष्टार्द्धमूनितं तेषु गुप्तसारशिवापदैः ॥ १३० ॥

विलिखेत्पूर्वपूर्ववर्णाच्च यथाज्ञानं महेश्वरि ।
साध्यमत्र सुराधीशे विशाला भुवनेश्वरी ॥ १३१ ॥

पूर्वोक्तैश्चाष्टगंधैश्च विलिखेत्सुसमाहितः ।
धारयेद्दक्षिणे पार्श्वे पशो रक्षा परा मता ॥ १३२ ॥

अश्वानां हस्तिनां चैव महिषाणां गवामपि ।
उष्ट्राणां दंष्ट्रिणां चैव रक्षायाः कारकं परम् ॥ १३३ ॥

**पशुरक्षाकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

इदं यन्त्रं मया तुभ्यं पशुरक्षाकरं स्मृतम् ।
गोपनीयं त्वया भद्रे देयं पुत्राय पार्वति ॥ १३४ ॥

इति पशुरक्षाकरं यन्त्रम् ।

अथ वक्ष्ये महिमदं महत्वपरिदायकम् ।
मान्यं सर्वत्र लोकेषु मानवः स च ॥ १३५ ॥
नभो वियच्छिवपदे खं नभश्च वियन्नभः ।
गोप्तुःसुरास्ततः प्रोक्तं वियत्खं च क्रमाल्लिखेत् ॥ १३६ ॥

**महिमदं यन्त्रम्**

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

पूर्वपूर्वविभागेन कोष्ठकस्य विभेदतः ।
इष्टार्द्धमूनितं तेषु गुप्तसारशिवापदैः ॥ १३७ ॥
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखत्पूर्वकोष्ठे तु पूर्वकोष्ठविभेदतः ॥ १३८ ॥

साध्यमत्र महेशानि ! ब्रह्माणी परिकीर्तिता ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिखेद्यन्त्रमुत्तमम् ॥ १३९ ॥
धारयेद्यन्त्रराजं तु बाहौ वा मस्तकेपि वा ।
धारणाच्च महत्त्वं तु जायते नात्रसंशयः ॥ १४० ॥

इति महिमदं २१ यन्त्रम् ।

जलस्तंभकरं चान्यद्यन्त्रं ते वच्मि साम्प्रतम् ।
येन विज्ञातमात्रेण जलस्तंभो भवेत्प्रिये ॥ १४१ ॥
नभो वियच्छिवपदे खं नभश्च वियन्नभः ।
गोप्तुः सुरा तथा प्रोक्तं वियत्खं च क्रमाल्लिखेत् ॥ १४२ ॥
इष्टार्द्धमूनितं तेषु गुप्तसारशिवापदैः ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ १४३ ॥
विलिखेत्पूर्वपूर्वाच्च मध्यकोष्ठविभेदतः ।
साध्यमत्र सुरेशानि ! विज्ञेया वैष्णवी परा ॥ १४४ ॥

**जलस्तम्भकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ४ | ५ | ६ | ३ |
| २ | ७ | ८ | १ |
| ६ | ३ | ४ | ५ |
| ८ | १ | २ | ७ |

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य सुरसुन्दरि ! ।
धारयेज्जलमध्ये तु प्रवाहस्य तु सन्मुखे ॥ १४५ ॥
जलं स्तंभयिते क्षिप्रं नात्र कार्या विचारणा ।
इदं यन्त्रं जलस्तंभकारकं समुदाहृतम् ॥ १४६ ॥
गोप्यं त्वया सदा भद्रे नाख्येयं यस्य कस्यचित् ।

इति जलस्तंभकरं यन्त्रम् ।

क्षेत्ररक्षाकरं यन्त्रं संप्रवक्ष्येऽधुना प्रिये ।
येन विज्ञातमात्रेण धान्यानां रक्षणं भवेत् ॥ १४७ ॥

वियन्नभः शिवपदे खं नभश्च नभो नभः ।
गोप्तुः सुरानन प्रोक्तं वियत् खं च सुरेश्वरि ॥ १४८ ॥

इष्टार्द्धमूनितं तेषु गुप्तसारशिवापदैः ।
पूर्वपूर्वविभेदेन साध्यसाधकयोस्तथा ॥ १४९ ॥

वर्णनिकीकृत्य तदा दलीकृत्य ततो लिखेत् ।
पूर्वपूर्वविभेदेन विलिखेद्यन्त्रनायकम् ॥ १५० ॥

**क्षेत्ररक्षाकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ३ | ६ | ५ | ४ |
| १ | ८ | ७ | २ |
| ५ | ४ | ३ | ६ |
| ७ | २ | १ | ८ |

साध्यमत्र महेशानि ! उपांगललिता तथा ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिखेद्यन्त्रमुत्तमम् ॥ १५१ ॥

धारयेद्दक्षिणे पार्श्वे हलस्य परमेश्वरि ! ।
न तस्य जायते क्वापि भयं क्षेत्रसमुद्भवम् ॥ १५२ ॥

ईतेर्भयं नाशमेति परचक्रभयं न हि ।
जायते परमशानि सस्यानां परमास्थितिः ॥ १५३ ॥

इदं यन्त्रं वरारोहे क्षेत्ररक्षाकरं परम् ।
कर्षकाणां हितार्थाय तवाग्रे प्रकटीकृतम् ॥ १५४ ॥

इति क्षेत्ररक्षाकरं यन्त्रम् ।

चोरनाशकरं यन्त्रं शृणु मत्प्राणवल्लभे ।
द्वितीयेष्टमे कोष्ठे रुद्रे चैव त्रयोदशे ॥ १५५ ॥

षोडशे दशमे बाणे तृतीये च क्रमाल्लिखेत् ।
गजगत्या परानंकानेकीकृत्य दलीकृतान् ॥ १५६ ॥

पूरयेत्पूर्वपूर्वाच्च कोष्ठभेदात्सुरेश्वरि ।
साध्यसाधकयोर्वर्णान्विलिखेत्परमेश्वरि ॥ १५७ ॥

साध्यमत्र महादेवि ! कालिका परमेश्वरी ।
पूर्वोक्तैर्गन्धमिलितैर्द्रव्यैः सम्यग्विलेखयेत् ॥ १५८ ॥
धारयेत्कंठगं सम्यङ्निर्भयो जायते क्षणात् ।
चौरा विनाशमायान्ति मार्गस्था वनवासिनः ॥ १५९ ॥

**चौरनाशनं यन्त्रम्**

| | | | |
|---|---|---|---|
| १४ | १ | ८ | ११ |
| ७ | १२ | १३ | २ |
| ९ | ६ | ३ | १६ |
| ४ | १५ | १० | ५ |

यन्त्रस्य धारणाद्देवि जायन्ते सुखभागिनः ।
इदं यन्त्रं चौरनाशकारकं परिकीर्त्तितम् ॥ १६० ॥
गोपनीयं प्रयत्नेन सर्वथा परमेश्वरि ! ।

इति चौरनाशकरं यन्त्रम् २२ ।

अथ वक्ष्ये महेशानि ! कूटदुर्गहरं परम् ।
यन्त्रं ते संप्रवक्ष्यामि श्रुत्वा गोप्यं त्वयानघे ॥ १६२ ॥
नागे पक्षे विश्वमिते रुद्रे पंक्तौ च षोडशे ।
तृतीये पंचमे मन्त्री विलिखेत्क्रमशः सुधीः ॥ १६३ ॥

**कूटदुर्गहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |
| १० | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |

नागगत्या परानंकान् शेषकोष्ठेषु संल्लिखेत् ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ १६४ ॥

विलोमगतिना पश्चाच्छेषांकान् पूरयेत्सुधीः ।
साध्यमत्र महेशानि ! मनः सिद्धिदा ॥ १६५ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेद्यन्त्रनायकम् ।
धारयेद्दक्षिणे पार्श्वे घोटकस्य सुरेश्वरि ॥ १६६ ॥

समारुह्य हयं पश्चाद्दुर्गकूटे विशेत्पुनः ।
विजयो जायते देवि नात्र कार्या विचारणा ॥ १६७ ॥

इदं यन्त्रं कूटदुर्गहरणं परिकीर्तितम् ।
गोपनीयं सुरेशानि ! ममातिप्रियकारकम् ॥ १६८ ॥

इति कूटदुर्गहरं यन्त्रम् ।

व्याघ्रविद्रावणं चान्यं यन्त्रराजं शृणु प्रिये ।
अरण्ये निर्जने देशे व्याघ्राद्यैश्च समन्विते ॥ १६९ ॥

उपयोगि महायन्त्रं पाथानां दुर्गचारिणाम् ।
महापर्वतसंस्थानां हितदं भयनाशनम् ॥ १७० ॥

**व्याघ्रविद्रावणं यन्त्रम्**

| | | | |
|---|---|---|---|
| २ | ५ | ४ | ७ |
| ३ | ८ | १ | ६ |
| ५ | २ | ७ | ४ |
| ८ | ३ | ६ | १ |

षोडशे दशमे बाणे वह्नौ नेत्रेष्टमे पुनः ।
शिवे विश्वे ततः पश्चान्नागगत्या प्रपूरणम् ॥ १७१ ॥

साध्यसाधकयोर्वर्णानेकीकृत्य प्रतिष्ठितान् ।
पूर्वपूर्वविलोमेन पूरयेद्देशिकोत्तमः ॥ १७२ ॥

साध्यमत्र प्रिये वाणी वीणापुस्तकधारिणी ।
पूर्वोक्तविधिना लेख्यं यन्त्रराजं विलेपनैः ॥ १७३ ॥

धारयेन्मूर्ध्नि हस्ते वा प्रकोष्ठे व्यंगुलीषु वा ।
धारणान्निर्भयो भूत्वा विचरेत्तु यथासुखम् ॥ १७४ ॥

न व्याघ्रवृकभल्लूक-गजसर्पजलूकजम् ।
भयं तु जायते क्वापि सत्यमेव वरानने ॥ १७५ ॥

इदं यन्त्रं व्याघ्रभयविद्रावणकरं स्मृतम् ।
सर्वथा गोपितव्यं ते मम वाक्यं महेश्वरि ॥ १७६ ॥

इति व्याघ्रविद्रावणं यन्त्रम् २६ ।

सर्वविघ्नहरं यन्त्रं विघ्नाधिपतये स्मृतम् ।
तत्तेहं सम्प्रवक्ष्यामि श्रुत्वा विघ्नैर्न बाध्यते ॥ १७७ ॥

नागे पक्षे विश्वसंख्ये रुद्रे पंक्तौ विकारके ।
बह्नौ बाणे लिखेत् पश्चान्नागगत्या ततः परम् ॥ १७८ ॥

साध्यसाधकयोर्वर्णनिकोकृत्य दलोकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ १७९ ॥

**सर्वविघ्नहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| ५ | २ | ७ | ४ |
| ८ | ३ | ६ | १ |
| २ | ५ | ४ | ७ |
| ३ | ८ | १ | ६ |

साध्यमत्र महेशानि ! रमा कमलवासिनी ।
अष्टगंधैः सुगंधैस्तु विलिखेद्यन्त्रनायकम् ॥ १८० ॥

लिखित्वा धारयेद्गेहे देहे बाहौ तथोदरे ।
धारणान्मानवो देवि ! न विघ्नभयभाग्भवेत् ॥ १८१ ॥

सुसंतुष्टेन च मया हेरम्बाय प्रदर्शितम् ।
तवाग्रहात्पुनरयं यन्त्रराजो मयोदितः ॥ १८२ ॥

इति सर्वविघ्नहरं २७ यन्त्रम् ।

भूतविद्रावणं यन्त्रं तथा प्रेतनिवारणम् ।
साम्प्रतं कथयिष्यामि सिद्धिपारददं परम् ॥ १८३ ॥

ममातिप्रेमदं यन्त्रं पारदं भवपारदम् ।
मनौ रवौ सरे चन्द्रे वेदे तर्कमितेंकके ॥ १८४ ॥

तिथौ लिखेत्क्रमानङ्कान् नागगत्या ततः परम् ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ १८५ ॥

विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ।
साध्यमत्र महेशानि ! रौद्री वृषभवाहिनी ॥ १८६ ॥

अष्टगन्धैः समालिख्यं पूर्वोक्तैर्विलिखेत्प्रिये ।
आरभेद्यन्त्रमध्याच्च पूर्वभागे विचक्षणः ॥ १८७ ॥

सिद्धिदं पारदं च यन्त्रम्

| | | | |
|---|---|---|---|
| ४ | ७ | २ | ५ |
| १ | ६ | ३ | ८ |
| ७ | ४ | ५ | २ |
| ६ | १ | ८ | ८ |

पश्चात्क्रियां पारदस्य प्रकुर्यात्साधकोत्तमः ।
इदं यन्त्रं सिद्धिरूपं तुभ्यं सम्यक् प्रदर्शितम् ॥ १८८ ॥
अन्ते तु भेषजं सिद्धगुटिकाचूर्णकल्कजम् ॥ १८९ ॥

महापारदसिद्धिं च ददाति सुरसुन्दरि ।
गोपनीयं प्रयत्नेन कलौ कल्पद्रुमोपमम् ॥ १९० ॥

इति सिद्धिदं पारदं च यन्त्रम् ।

अथ अद्भुततरं यन्त्रं योगसिद्धिविधायकम् ।
तवाग्रे कथयिष्यामि योगिनां हितकाम्यया ॥ १९१ ॥

रवौ मुनौ विधौ पश्चात्स्वरे विश्वे शिवे गजे ।
पक्षे वह्नौ बाणमिते पंक्तौ षोडशके ततः ॥ १९२ ॥

तर्के तुर्ये तिथौ चाङ्के विलिख्य परमेश्वरि ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ १९३ ॥

पूरयेद्विधिनानेन पूर्वपूर्वविलोमतः ।
साध्यमत्र च देवेशि ! वाराही चक्रधारिणी ॥ १९४ ॥

अष्टगन्धैश्च पूर्वोक्तैर्विलिखेत्सुरवन्दिते ।
धारयेद्धृदये देवि ! पश्चाद्योगं समभ्यसेत् ।
योगसिद्धिमवाप्नोति सत्यं सत्यं वरानने ॥ १९५ ॥

योगसिद्धिदं यन्त्रम्

| | | | |
|---|---|---|---|
| १४ | ९ | ८ | ३ |
| ७ | ४ | १३ | १० |
| १ | ६ | ११ | १६ |
| १२ | १५ | २ | ५ |

इदं यन्त्रं गोपनीयं योगसिद्धिदमद्भुतम् ।
योगिने साधवे देयं छात्रायाप्यथवा प्रिये ॥ १९६ ॥

इति योगसिद्धिदं यन्त्रमेकोनत्रिंशम् ।

सर्पाकरहरं यन्त्रमहितुण्डहितावहम् ।
धारणात्स्थाननिर्मोकवारणं विषमारणम् ॥ १९७ ॥
डंडकूर्तिमिडंडूक महाशी विषदारणम् ।
हरणं परमं यन्त्रं महाकौतुककारणम् ॥ १९८ ॥

सर्पहरं यन्त्रम्

| | | | |
|---|---|---|---|
| २ | ५ | १२ | १५ |
| ११ | १६ | १ | ६ |
| १३ | १० | ७ | ४ |
| ८ | ३ | १४ | ९ |

रसे वेदे तिथौ नन्दे वह्नौ बाणे च दिङ्मिते ।
विकारे विश्वसंख्ये च शिवे वसुमिते द्वये ॥ १९९ ॥
भानौ मनौ तथा चन्द्रे स्वरे च विधिना प्रिये ।
साध्यमत्र महेशानि ! विज्ञेया वटयक्षिणी ॥ २०० ॥

पूर्वोक्तविधिना लेख्यं धारयेदङ्गसङ्गतम् ।
धारणाच्च पलायन्ते नागादश दिशोद्भुताः ॥ २०१ ॥
इदं यन्त्रं सर्पहरं गोप्यं तुभ्यं मयोदितम् ॥ २०२ ॥

इति सर्पहरं यन्त्रं त्रिंशत्तमम् ।

नवकोष्ठात्मकं यन्त्रं समष्टिफलदायकम् ।
नवरोगहरं ह्येतच्छृणुष्व गजगामिनि ॥ २०३ ॥
स्त्रीणामृतुकरं ह्येतत्तथा शोणितरोगहम् ।
राजयक्ष्महरं चैव महातीवसारनाशनम् ॥ २०४ ॥

**क्रतुप्रतिबन्धकरोगहरम्**

| | | | |
|---|---|---|---|
| २ | ५ | १२ | १५ |
| ११ | १६ | १ | ६ |
| १३ | १० | ७ | ४ |
| ८ | ३ | १४ | ९ |

**शोणितरोगहरम्**

| | | | |
|---|---|---|---|
| १५ | १२ | ५ | २ |
| ६ | १ | १६ | ११ |
| ४ | ७ | १० | १३ |
| ९ | १४ | ३ | ८ |

**राजयक्ष्महरम्**

| | | | |
|---|---|---|---|
| ९ | ४ | ६ | १५ |
| १४ | ७ | १ | १२ |
| २ | १० | १६ | ५ |
| ८ | १३ | ११ | २ |

**अतीसारहरम्**

| | | | |
|---|---|---|---|
| ८ | १३ | ११ | २ |
| ३ | १० | १६ | ५ |
| १४ | ७ | १ | १२ |
| ९ | ४ | ६ | १५ |

**गलगण्डहरम्**

| | | | |
|---|---|---|---|
| ८ | ३ | १४ | ९ |
| १३ | १० | ७ | ४ |
| ११ | १६ | १ | ६ |
| २ | ५ | १२ | १५ |

**पूतनापीडाहरम्**

| | | | |
|---|---|---|---|
| ९ | १४ | ३ | ८ |
| ४ | ७ | १० | १३ |
| ६ | १ | ६ | ११ |
| १५ | १२ | ५ | २ |

**ज्वरादिशान्तिकरम्**

| | | | |
|---|---|---|---|
| २ | ११ | १३ | ९ |
| ४ | १६ | १० | ३ |
| २२ | १ | ७ | १४ |
| १५ | ६ | ४ | ८ |

**गुदरोगहरम्**

| | | | |
|---|---|---|---|
| १ | १२ | ५ | २ |
| ६ | १ | १६ | ११ |
| ४ | ७ | १० | १३ |
| ९ | १४ | ३ | ८ |

**प्रमेहहरम् यन्त्रम्**

| | | | |
|---|---|---|---|
| १५ | ६ | ४ | ९ |
| १२ | १ | ७ | १४ |
| ५ | १६ | १० | ३ |
| २ | ११ | १३ | ८ |

गलगण्डहरं चैव पूतनाशमनं तथा ।
शान्तिदं गुदरोगघ्नं मेहघ्नं समुदाहृतम् ॥ २०५ ॥
समष्टि नवरोगाणां नाशनं सम्यगीरितम् ।
स्वरे चन्द्रे मनौ भानौ पक्षे नागे शिवे तथा ॥ २०६ ॥

विश्वे च षोडशे पंक्तौ वाणे वह्नौ च मन्दके ।
तिथौ तुर्ये रसे चैव पूरयेद्देवि साधकः ॥ २०७ ॥

साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमविधिना प्रिये ॥ २०८ ॥

साध्यमत्र महेशानि ! विज्ञेया रजनीप्रिया ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिख्य परमेश्वरि ॥ २०९ ॥

धारयेद्दक्षिणांगे वा स्त्रीणां वामे तु धारयेत् ।
यत्र यत्र भवेत्पीडा तत्र तत्रापि धारयेत् ।
धारणान्नाशमायान्ति नवरोगाः सुरेश्वरि ॥ २१० ॥

इदं यन्त्रं नवकोष्ठफलदं परिकीर्त्तितम् ।
सत्यं सत्यं गोपनीयं नैवाख्येयं दुरात्मने ॥ २११ ॥

इति नवकोष्ठात्मकं यन्त्रम् ।

अथ वृष्टिकराण्यत्र तानि मत्तो निशामय ।
वर्णमात्राविभेदेन युगरूपप्रदं भवेत् ॥ २१२ ॥

अनावर्षणकाले तु कर्त्तव्यं यन्त्रमुत्तमम् ।
तदा वृष्टिकरं ज्ञेयं विपरीतार्ण-सम्भवम् ॥ २१३ ॥

अतिवृष्टिकरं ह्येतत्तथा वृष्टिनिवारणम् ।
वर्णाद्यमात्राभेदेन द्विधा ज्ञेयं विचक्षणैः ॥ २१४ ॥

वृष्टिकरं वृष्टिनिवारकं च यन्त्रं सपक्षानन्तरम्

| | | | |
|---|---|---|---|
| १४ | १ | ८ | ११ |
| ७ | १२ | १३ | २ |
| ९ | ६ | ३ | १६ |
| ४ | १५ | १० | ५ |

| | | | |
|---|---|---|---|
| १० | १ | ८ | १५ |
| ७ | १२ | ९ | २ |
| १३ | ६ | ३ | १२ |
| ४ | ११ | १४ | ५ |

पक्षे नागे शिवे विश्वे षोडशे पंक्तिसंमिते ।
वाणे वह्नौ लिखेद्देवि नागसंख्या ततः परम् ॥ २१५ ॥

साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ २१६ ॥

साध्यमत्र वरारोहे महाभीमोग्रदंष्ट्रिणी ।
भीमादेवी समाख्याता पूर्वोक्तविधिना लिखेत् ॥ २१७ ॥

धारयेदम्बरे स्तम्भे ध्वजाग्रे वा स्वके गृहे ।
धारणाज्जायते वृष्टिः शमयेत्प्रतिमोचनम् ॥ २१८ ॥
इदं यन्त्रं मया प्रोक्तं निग्रहानुग्रहात्मकम् ॥ २१९ ॥

इति वृष्टिकरं वृष्टिनिवारकं च यन्त्रम् ३२ ।

दुर्भिक्षहरणं यन्त्रं वक्ष्येऽहं साम्प्रतं प्रिये ।
यस्य विज्ञानमात्रेण सुभिक्षं तत्क्षणात्भवेत् ॥ २२० ॥

चन्द्रे स्वरे तथा भानौ मनौ पञ्चदशे तथा ।
नवमे तर्कसंख्ये च तुर्ये चैव यथाक्रमम् ॥ २२१ ॥

**दुर्भिक्षहरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १ | ११ | १४ | ८ |
| ३ | ७ | २ | १२ |
| ६ | १६ | ९ | ३ |
| १० | ४ | ५ | १५ |

विलिखेत्साधकश्रेष्ठो नागगत्या ततः परम् ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ २२२ ॥

विलिखेत्पूर्वपूर्वाच्च विलोमेन सुरेश्वरि ! ।
साध्यमत्र महेशानि ! देवी शाकंभरी परा ॥ २२३ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्यथाविभवसंभवैः ।
विलिख्य धारयेत्प्राज्ञस्तुलायां दण्डमण्डले ॥ २२४ ॥

सुभिसं तत्क्षणाद्भूयान्महादुर्भिक्षनाशनम् ।
सम्यक् कथितं तुभ्यं गोपनीयं प्रयत्नतः ॥ २२५ ॥

इति दुर्भिक्षहरं यन्त्रम् ३३ ।

कोष्ठत्रयात्मकं यन्त्रं शृणु मत्प्राणवल्लभे ।
नानोत्सवप्रदं चाद्यं द्वितीयं नगरप्रदम् ॥ २२६ ॥
तृतीयं राज्यदं चैव गुणत्रयमयात्मकम् ।
यन्त्रराजं समासेन वक्ष्यामि शृणु भामिनि ॥ २२७ ॥
नागे पक्षे विश्वसंख्ये रुद्रे पंक्तौ तु षोडशे ।
तृतीये पंचमे कोष्ठे विलिखेत्प्रोक्तमार्गतः ॥ २२८ ॥

**गुणत्रयं यन्त्रम्**

| | | | |
|---|---|---|---|
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |
| १७ | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |

शेषांकान्नागगत्या तु विलिखेच्छेषकोष्ठके ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ २२९ ॥
दलीकृत्याद्य कोष्ठात्तु पूर्वपूर्वविलोमतः ।
साध्यमत्र महादेवि ! तोतलापरमेश्वरी ॥ २३० ॥
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य परमेश्वरि ! ।
धारयेदङ्गसंलग्नं कामनावांच्छितार्थदम् ॥ २३१ ॥
वर्णमात्राविभेदेन कार्यभेदं समाचरेत् ।
इदं यन्त्रं हि फलदं मया ते परिकीर्त्तितम् ॥ २३२ ॥
धारणाज्जायते राज्यं महानगरलाभदम् ।

इति गुणत्रयं यन्त्रम् ४३ ।

शत्रुराज्यं हरन्त्याशु शत्रुलक्ष्मीहरं परम् ।
फलद्वयप्रदं यन्त्रं संक्षपाच्छृणु पार्वति ! ॥ २३३ ॥
विश्वेरुद्रे वसौ नेत्रे वह्नौ बाणे च दिङ्मिते ।
षोडशे विलिखेत्पश्चान्नागगत्या ततः परम् ॥ २३४ ॥
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखेपूर्वकोष्ठाच्च विलोमविधिना प्रिये ॥ २३५ ॥

साध्यमत्र वरारोहे ! विकटा परमेश्वरी ।
पूर्वोक्तैरेव तैर्द्रव्यैः सुगंधैश्चाष्टसंख्यकैः ॥ २३६ ॥

**शत्रुराज्यहरं शत्रुलक्ष्मीहरं च यन्त्रम्**

| | | | |
|---|---|---|---|
| १० | ४ | ५ | ११ |
| ६ | १६ | ९ | ३ |
| १३ | ७ | २ | १२ |
| १ | ११ | १६ | ८ |

लिखित्वा धारयेत्प्राज्ञः शत्रुराज्यं पराजयेत् ।
शत्रुलक्ष्मीं च लभते नात्र कार्या विचारणा ॥ २३७ ॥

इदं यन्त्रं समाख्यातं महाप्रत्ययकारकम् ।
गोप्यं सदा त्वया भद्रे ! नाख्येयं हि दुरात्मने ॥ २३८ ॥

इति शत्रुराज्यहरं शत्रुलक्ष्मीहरं च यन्त्रम् ।

अथ काव्यकरं वक्ष्ये तथा मेधाविवर्द्धनम् ।
फलद्वयाकुलं यन्त्रं मत्तः शृणु वरानने ॥ २३९ ॥

षोडशे दशमे बाणे वह्नौ पक्षे वसौ शिवे ।
विश्वे स्वरे च प्रथमे मनौ भानौ तथांकके ॥ २४० ॥

तिथौ तुर्ये रसमिते पूरयेच्च समाहितः ।
पूरयेत्साककश्रेष्ठो नागगत्या ततः परम् ॥ २४१ ॥

साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वकोष्ठाच्च पूर्वपूर्वविभेदतः ॥ २४२ ॥

साध्यमत्र महेशानि ! विज्ञेया रक्तदन्तिका ।
पूर्वोक्तलेख्यद्रव्येण विलिखेद्यन्त्रनायकम् ॥ २४३ ॥

धारयेत्कण्ठगं शश्वत्सदा तत्फलभाग्भवेत् ।
काव्यं तु कुरुते देवि ! घटिका-शतकं क्रमात् ॥ २४४ ॥

महाकविर्भवेन्मासान्महाबुद्धिमतां वरः ॥ २४५ ॥

काव्यकरं मेधाविवर्द्धनं च यन्त्रम्

| | | | |
|---|---|---|---|
| १० | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |

इदं यन्त्रं फलद्वन्द्वजनकं समुदाहृतम् ।
गोपनीयं प्रयत्नेन नान्यथा मम भाषितम् ॥ २४६ ॥

इति काव्यकरं मेधाविवर्द्धनं च यन्त्रम् ।

अथ वक्ष्ये चतुःकोष्ठं यन्त्रं महिमवर्द्धनम् ।
महामृत्युहरं चैवमल्पमृत्यु हरं तथा ॥ २४७ ॥
अपमृत्यूहरं चान्यत्तथादुःस्वप्ननाशनम् ।
चतुष्कफलदं भद्रे ! मम चातिप्रियं करम् ॥ २४८ ॥
विकारे दशमे षाणे वह्नौ नेत्रेऽष्टमे पुनः ।
रुद्रे विश्वे लिखेद्देवि ! नागगत्या ततः परम् ॥ २४९ ॥

महामृत्युहरम्

| | | | |
|---|---|---|---|
| १० | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |

अल्पमृत्युहरम्

| | | | |
|---|---|---|---|
| ८ | १३ | ३ | १० |
| ११ | २ | १६ | ५ |
| १४ | ७ | ९ | ४ |
| १ | १२ | ६ | १५ |

अपमृत्युहरम्

| | | | |
|---|---|---|---|
| १ | १४ | ११ | ८ |
| १२ | ७ | २ | १३ |
| ६ | ९ | १६ | ३ |
| १५ | ४ | ५ | १० |

दुःस्वप्ननाशनम्

| | | | |
|---|---|---|---|
| १५ | ६ | १२ | १ |
| ४ | ९ | ७ | १४ |
| ५ | १६ | २ | ११ |
| १० | ३ | १३ | ८ |

साध्यसाधकयोर्वर्णानेकीकृत्य वलीकृतान् ।
पूरयेत्पूर्वपूर्वेण विलोमगमनेन च ॥ २५० ॥
साध्यमत्र महेशानि ! तथा संमोहिनी परा ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिख्य विधिपूर्वकम् ॥
धारयेद्वै सदा कण्ठे महामृत्युं विनाशयेत् ॥ २५१ ॥

इदं यन्त्रचतुष्कं तु महादेवि ! निवेदितम् ।
गोपनीयं प्रयत्नेन स्वयोनिरिव सुन्दरि ॥ २५२ ॥

इति चतुष्कोष्ठात्मकं यन्त्रम् ।

अथातः सम्प्रवक्ष्यामि शतमल्लहरंत्विदम् ।
येन विज्ञातमात्रेण शतमल्लान् क्षणात्क्षिपेत् ॥ २५३ ॥

पञ्चमे भुवने रुद्रे तुर्ये वह्नौ रवौ तथा ।
विश्वे रसे विकारे च मुनौ चैव द्वितीयके ॥ २५४ ॥

**बलकरं यन्त्रम्**

| | | | |
|---|---|---|---|
| १४ | ११ | ५ | ४ |
| १ | ८ | १० | १५ |
| १२ | १३ | ३ | ६ |
| ७ | २ | १६ | ९ |

नवमे दशमे त्वाद्ये नागे पञ्चदशे पुनः ।
पूरयेत्परमेशानि ! पूर्वपूर्वविभेदतः ॥ २५५ ॥

साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
पूर्वोक्तविधिना लेख्यं वर्णरूपविभेदतः ॥ २५६ ॥

साध्यमत्र महेशानि ! विज्ञेया शिवदूतिका ।
पूर्वोक्तगन्धैर्विधिवल्लिखित्वा धारयेत्प्रिये ॥ २५७ ॥

शिखायामथवा कण्ठे करे वा वामदक्षिणे ।
धारणाज्जायते शौर्यं शतमल्लविमर्दनम् ॥
बलं भवति तस्याशु नवनागसहस्रकम् ॥ २५८ ॥
इदं यन्त्रं सदा गोप्यं देयं पुत्राय साधवे ॥ २५९ ॥

इति बलकरं यन्त्रम् ।

प्रतिमाचालनं यन्त्रं शृणु चान्यत्वशानने ।
तदेव चाग्निसंस्तंभकारकं समुदीरितम् ॥ २६० ॥

रवौ वह्नौ रसे विश्वे मनौ बाणे चतुर्थके ।
रुद्रे त्वांघे पंक्तिसंख्ये तिथौ नागे स्वरे तथा ॥ २६१ ॥

षोडशे नवमे पक्षे संमिते क्रमशो लिखेत् ।
साध्यसाधकयोर्वर्णानिकीकृत्य दलीकृतान् ॥ २६२ ॥

विलिखेत्पूर्वपूर्वाच्च विधिना परमेश्वरि ! ।
साध्यमत्र महेशानि ! चामुण्डा शववाहिनी ॥ २६३ ॥

**प्रतिमाचालनकरमग्निस्तंभकरं च यन्त्रम्**

| | | | |
|---|---|---|---|
| ९ | १६ | २ | ७ |
| ६ | ३ | १३ | १२ |
| १५ | १० | ८ | १ |
| ४ | ५ | ११ | १४ |

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिखेच्चाष्टगन्धकैः ।
धारयेत्प्रतिमायास्तु मूर्धिन सा चलते क्षणात् ॥ २६४ ॥

इदमेव परं यन्त्रं विलोड्यजलमध्यतः ।
प्रोक्षयेदग्निसंदग्धं भवति प्रिये ॥
महान्तमग्निं शमयेद्दावानलमथापि वा ॥ २६५ ॥

इदं यन्त्रं मया प्रोक्तं प्रतिमाचालनं परम् ।
महाग्निस्तंभनं भद्रे ! सम्यगेव प्रकाशितम् ॥ २६६ ॥

इति प्रतिमाचालनकरमग्निस्तंभकरं च
यन्त्रमेकोनचत्वारिंशत्तम् ।

अथ सम्यक् शृणु प्राज्ञे यन्त्रं तु कुलवर्द्धनम् ।
येषां कुले संततिर्नो तेषां चातिहितं महत् ॥ २६७ ॥

वन्ध्यानां पुरुषाणां तु नारीणां तु विशेषतः ।
हितकारि मया प्रोक्तं यन्त्रं तन्त्रार्थकोविदे ॥ २६८ ॥

तुर्ये षष्ठेऽश्वगत्या च मन्त्रिगत्या नवात्मके ।
वाजिगत्या तिथौ लेख्यं गजगत्या मनौ लिखेत् ॥ २६९ ॥

सूर्ये तु वाजिगत्याथ सप्तमे मन्त्रिमार्गतः।
प्रथमे वाजिगत्याथ विलिखेत् साधकोत्तमः ॥ २७० ॥

तदंकाद्गजगत्या तु नागकोष्ठेषु संल्लिखेत्।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ २७१ ॥

कुलवर्द्धनं यन्त्रम्

| | | | |
|---|---|---|---|
| ८ | १५ | १० | १ |
| ९ | २ | ७ | १६ |
| ३ | १२ | १३ | ६ |
| १४ | ५ | ४ | ११ |

विलिखेत्पूर्वपूर्वात्तु विलोमगतिना प्रिये।
साध्यमत्र महेशानि ! पश्चपश्चात्मिका परा ॥ २७२ ॥

पूर्वोक्तैश्चाष्टगंधैश्च विलिख्य सुरसुन्दरि।
धारयेत्कटिभागे तु स्त्रियः कण्ठे तु बंधयेत् ॥ २७३ ॥

धारणाद्यन्त्रराजस्य कुलं वर्द्धति भामिनि।
अष्टपुत्रकुलं गेहे जायते पौत्रसंभवम् ॥ २७४ ॥

इदं यन्त्रं कुलकरं मया ते समुदीरितम्।
गोपनीयं प्रयत्नेन सर्वथा वीरवन्दिते ॥ २७५ ॥

इति कुलवर्द्धनं यन्त्रम्।

रथस्तंभकरं चैव गतिस्तंभकरं तथा।
शृणु प्राज्ञे प्रवक्ष्यामि नानाद्भुतविधायकम् ॥ २७६ ॥

रुद्रे त्रयोदशे पक्षे नागे बाणे तृतीयके।
षोडशे दशमे देवि पूरयेत्क्रमशः सुधीः ॥ २७७ ॥

तदङ्कान्नागगत्या तु नागकोष्ठानि पूरयेत्।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ २७८ ॥

विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ।
साध्यमत्र महेशानि ! विज्ञेया शांभरी परा ॥ २७९ ॥
पूर्वोक्तैश्चाष्टगंधैश्च लिखित्वा धारयेत्करे ।
रथः स्तंभमयात्याशु वाजिवेगपुरस्कृतः ॥ २८० ॥

रथस्तम्भकरं यन्त्रम्

| | | | |
|---|---|---|---|
| ४४ | ३ | ६ | ९ |
| ५ | १० | १५ | ४ |
| ११ | ८ | १ | १४ |
| २ | १३ | १२ | ७ |

शीघ्रगं च तथा पंगुं कुरु तेन विचारणा ॥ २८१ ॥
इदं यन्त्रं रथस्तंभगतिस्तम्भकरं स्मृतम् ।
गोपनीयं त्वया भद्रे ! निन्दकाय न दापयेत् ॥ २८२ ॥

इति रथस्तंभगतिस्तंभकरं यन्त्रम् ।

अथ वक्ष्ये महादेवि ! द्यूते विजयदायकम् ।
विवादे जयदं चैव शृणु देवि ! यथार्थतः ॥ २८३ ॥
पञ्चमे वह्निकोष्ठे च षोडशे पंक्तिसंमिते ।
तुर्ये रसे नंदमिते तिथौ सूर्ये स्वरे लिखेत् ॥ २८४ ॥

द्यूतविवादयोर्जयकरम्

| | | | |
|---|---|---|---|
| १४ | ११ | २ | ५ |
| १ | ६ | १० | १५ |
| ७ | ४ | १६ | ९ |
| १२ | १३ | ८ | ३ |

द्यूतविवादयोर्जयकरयन्त्रम्

| | | | |
|---|---|---|---|
| ३ | ६ | १३ | १२ |
| १४ | ११ | ७ | २ |
| १० | १५ | १ | ८ |
| ५ | ४ | ९ | १६ |

द्वितीये विश्वसंख्ये तु मनौ प्रथमकोष्ठके ।
नागे शिवे क्रमाल्लेख्यं पंक्तिकोष्ठेऽप्युभे तथा ॥ २८५ ॥

साध्यसाधकयोर्वर्णानिकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतितोपि वा ॥ २८६ ॥

साध्यमत्र महेशानि ! विज्ञेया पञ्चभद्रिका ।
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य वरभामिनि ।
धारयेज्जानुमध्ये तु द्यूते विजयभाग्भवेत् ॥ २८७ ॥

विवादे कंठसंलग्नं यन्त्रं कुर्यात्सदानघे ।
विवादे विजयो जायेच्छत्रुनाशकरं परम् ॥ २८८ ॥

इदं यन्त्रं समुद्दिष्टं शुभायार्थकरं परम् ।
सदा गोप्यं त्वया देवि महाकौतुकदायकम् ॥ २८९ ॥

इति द्यूतविवादयोर्जयकरं यन्त्रम् ।

अथ वक्ष्ये शुभे देवि ! महानृत्यप्रदं परम् ।
इन्द्रजालकरं चान्यत्फलद्वयसमावृतम् ॥ २९० ॥

नटविद्याहितं चैव महाकपटकारकम् ।
पंक्तौ विकारे वह्नौ च बाणे नागे तु पक्षके ॥ २९१ ॥

विश्वे शिवे लिखेद्देवि नागगत्या ततः परम् ।
साध्यसाधकयोर्वर्णानिकीकृत्य दलीकृतान् ॥ २९२ ॥

नृत्येन्द्रिजालसिद्धिदम्

| | | | |
|---|---|---|---|
| ९ | ६ | १३ | १६ |
| ४ | १५ | १० | ५ |
| १४ | १ | ८ | ११ |
| ७ | १२ | १३ | २ |

विलिखेत्पूर्वपूर्वात्तु विलोमगतिना प्रिये ! ।
साध्यमत्र महादेवि ! देवी वज्रेश्वरी परा ॥ २९३ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य विधिपूर्वकम् ।
धारयेच्चरणे दक्षे नृत्यारंभे सुरेश्वरि ॥ २९४ ॥

इन्द्रजालिकविद्यायां लोकान्संदर्शयेत्त्विदम् ।
लोकानां दृष्टिबन्धां च कुरुते नात्र संशयः ॥ २९५ ॥

इदं यन्त्रं नृत्यकरं तथेंद्रजालसिद्धिदम् ।
कथितं गोपनीयं ते स्वयोनिरिव पार्वति ॥ २९६ ॥

इति नृत्येन्द्रजालसिद्धिदं यन्त्रम् ४३ ।

महासारस्वतं यन्त्रं तथा मन्त्रस्य सिद्धिदम् ।
उभयं ह्येकतो वक्ष्ये सावधानं तथा शृणु ॥ २९७ ॥
मूर्खाणां तु हितार्थाय तथा विद्याभिवृद्धये ।
नानामन्त्रार्थसिद्धीनां फलदं विधिना स्मृतम् ॥ २९८ ॥
शिवे विश्वे बाणसंख्ये वह्नौ तुर्ये रसे मनौ ।
रवौ तु पूरयेद्देवि ! पूर्वं नागस्य मार्गतः ॥ २९९ ॥

**महासारस्वतप्रदं यन्त्रम्**

| | | | |
|---|---|---|---|
| १६ | ९ | ४ | ५ |
| ३ | ६ | १५ | १० |
| १३ | १२ | १ | ८ |
| २ | ७ | १४ | ११ |

साध्यसाधकयोर्वर्णनिकीकृत्यं दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ ३०० ॥
साध्यमत्र वरारोहे ! देवी त्रिपुरमालिनी ।
पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य परिधारयेत् ॥ ३०१ ॥

कण्ठे सारस्वतप्राप्त्यै मन्त्रसिद्ध्यै तु मूर्द्धनि ।
धारणात्सर्वविद्यानां वेत्ता भवति भामिनि ॥
मन्त्रसिद्धिमवाप्नोति शीघ्रमेव न संशयः ॥ ३०२ ॥
इदं यन्त्रं समुद्दिष्टं महासारस्वतप्रदम् ।
मन्त्रसिद्धिकरं ह्येतद्गोपनीयं प्रयत्नतः ॥ ३०३ ॥

इति महासारस्वतप्रदं यन्त्रम् ।

चतुष्कोष्ठात्मकं यन्त्रं शृणु चान्यत्सुरेश्वरि ?
प्रथमं कोपहरणं घोरशब्दहरं परम् ॥ ३०४ ॥

षडीतिहरणं चान्यत् पाटच्चरहरं परम् ।
प्रवक्ष्यामि विभेदेन पूर्वपूर्वार्णभेदतः ॥ ३०५ ॥

रवौ मनौ तथा चन्द्रे स्वरे विश्वे शिवे गजे ।
पक्षे वह्नौ बाणमिते दशमे षोडशे रसे ॥ ३०६ ॥

तुर्ये तिथौ चाङ्कमिते विलिखेत्परमेश्वरी ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ ३०७ ॥

कोपह. यन्त्रम्

| | | | |
|---|---|---|---|
| ३ | ८ | ९ | १४ |
| १० | १३ | ४ | ७ |
| १६ | ११ | ६ | १ |
| ५ | २ | १५ | १२ |

घोरश. यन्त्रम्

| | | | |
|---|---|---|---|
| ५ | १६ | १० | ३ |
| २ | ११ | १३ | ८ |
| १५ | ६ | ४ | ९ |
| १२ | १ | ७ | १४ |

षडीति. यन्त्रम्

| | | | |
|---|---|---|---|
| १२ | १५ | २ | ५ |
| १ | ६ | ११ | १६ |
| ७ | ४ | १३ | १० |
| १४ | ९ | ८ | ३ |

पाटच्च. यन्त्रम्

| | | | |
|---|---|---|---|
| १४ | ७ | १ | १२ |
| ९ | ४ | ६ | १५ |
| ८ | १३ | ११ | २ |
| ३ | १० | १६ | ५ |

विलिखेत्पूर्वपूर्वाच्च कोष्ठसंख्याविभेदतः ।
साध्यमत्र महेशानि ! मालिनी परमेश्वरी ॥ ३०८ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य परिधारयेत् ।
बाहौ वा दक्षिणे कण्ठे धारयेद्यन्त्रनायकम् ॥ ३०९ ॥

धारणात्कोपहरणं घोरशब्दं च नाशयेत् ।
षडीतिहरणं क्षेत्रमध्यस्तंव विधारितम् ॥ ३१० ॥

पाटच्चरहरं मार्गे दृष्ट्वा यन्त्रं पुरो व्रजेत् ।
पाटच्चरभयं हित्वा सुखी चरति मार्गतः ॥ ३११ ॥

इदं यन्त्रं चतुष्कोष्ठसंज्ञकं परिकीर्त्तितम् ।
गोप्यं तु सर्वदा भद्रे ! नात्र कार्या विचारणा ॥ ३१२ ॥

इति चतुष्कोष्ठात्मकं यन्त्रम् ।

मृतकोत्थापनं चान्यद्विकलीकरणं तथा ।
यन्त्रं समष्टियोगेन कार्यद्वयसमावृतम् ॥ ३१३ ॥

नागे पक्षे तथा विश्वे रुद्रे पंक्तौ तु षोडशे ।
वह्निकोष्ठे बाणसंख्ये नागगत्या ततः परम् ॥ ३१४ ॥
साध्यसाधकयोर्वर्णानेकत्र योजयेत्पुनः ।
दलीकृत्य विलोमेन पूरयेद्देशिकोत्तमः ॥ ३१५ ॥
साध्यमत्र वरारोहे ! देवी त्रिपुरभैरवी ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिखेत्पूर्वमार्गतः ॥ ३१६ ॥

**मृतकोत्थापकं यन्त्रम्**

| | | | |
|---|---|---|---|
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |
| १० | ५ | ४ | १५ |
| ३ | १४ | ९ | ६ |

धारयेद्ब्रह्मरन्ध्रे च मृतकस्य वरानने ! ।
इदमेव रिपोर्गेहे निखनेद्देहलीतटे ॥
विकलीकरणं कुर्याद्यदासौ लंघयेद्धि तत् ॥ ३१७ ॥
वर्णमात्राक्रमभिदां ज्ञात्वा वै यन्त्रनायकम् ।
महाश्चर्यमयं देवि ! गोपनीयं प्रयत्नतः ॥ ३१८ ॥

इति मृतकोत्थापकं यन्त्रम् ४६ ।

इदानीं शृणु देवेशि ! षट्कोष्ठं तु महाद्भुतम् ।
यन्त्रराजं तु देवेशि ! सद्यः प्रत्ययकारकम् ॥ ३१९ ॥
धर्मप्रदं चार्थदं च कामदं मोक्षदं त्विदम् ।
ज्ञानदं लयदं ह्येतत्षट्कोष्ठं सकलार्थदम् ॥ ३२० ॥
विश्वे रुद्रे वसौ नेत्रे वह्नौ बाणे च दिङ्मिते ।
षोडशे चापरान्कोष्ठे नागगत्या समालिखेत् ॥ ३२१ ॥
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ ३२२ ॥
साध्यमत्र महेशानि ! भीमचण्डीपरात्परा ।
पूर्वोक्तैरेव तैर्द्रव्यैर्यथांकार्यं विचारितैः ॥ ३२३ ॥

विलिख्य यन्त्रराजं तु धारयेद्दक्षिणे करे।
हृदये वाथ देवेशि ! सद्यः फलमवाप्नुयात् ॥ ३२४ ॥

धर्मदं यन्त्रम्

| | | | |
|---|---|---|---|
| १५ | ४ | ५ | १० |
| ६ | ९ | १६ | ३ |
| १२ | ७ | २ | १३ |
| १ | १४ | ११ | ८ |

अर्थदं यन्त्रम्

| | | | |
|---|---|---|---|
| ११ | २ | ६ | १५ |
| १४ | ७ | ९ | ४ |
| ११ | २ | १६ | ५ |
| ८ | १३ | ३ | १० |

कामदं यन्त्रम्

| | | | |
|---|---|---|---|
| ८ | ११ | १४ | १ |
| १३ | २ | ७ | १२ |
| ३ | १६ | ९ | ६ |
| १० | ५ | ४ | १५ |

मोक्षदं यन्त्रम्

| | | | |
|---|---|---|---|
| १० | १३ | ३ | ८ |
| ५ | १६ | २ | ११ |
| ४ | ९ | ७ | १४ |
| १५ | ६ | १२ | १ |

ज्ञानदं यन्त्रम्

| | | | |
|---|---|---|---|
| ५ | १५ | १० | ५ |
| ९ | ६ | ३ | १६ |
| ७ | १२ | १३ | २ |
| १४ | १ | ८ | ११ |

लयदं यन्त्रम्

| | | | |
|---|---|---|---|
| १४ | १ | ८ | ११ |
| ७ | १२ | १३ | २ |
| ९ | ६ | ३ | १६ |
| ४ | १५ | १० | ५ |

इदं यन्त्रं च षट्कोष्ठं कथितं तव गौरवात्।
गोपनीयं त्वया भद्रे ! त्वां शपे कुलनायिके ॥ ३२५ ॥

इति षट्कोष्ठात्मकं यन्त्रम्।

खेचरीसिद्धिदं यन्त्रं कथयामि फलप्रदम्।
इदं यन्त्रं तु सकलार्थप्रदं परिकीर्त्तितम् ॥ ३२६ ॥
फलद्वयप्रदं ह्येतत्कार्यगौरवलाघवात्।
नवमे च तिथौ वेदे रसे षोडशके पुनः ॥ ३२७ ॥
दशमे पञ्चमे वह्नौ पक्षे नागे शिवे पुनः।
विश्वे स्वरे चन्द्रमिते मनौ भानौ समालिखेत् ॥ ३२८ ॥
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान्।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ ३२९ ॥
साध्यमत्र वरारोहे ऋद्धिस्तु परमेश्वरी।
पूर्वोक्तैरेव तैर्द्रव्यैर्लिखित्वा यन्त्रनायकम् ॥ ३३० ॥
धारयेच्च स्वके देहे खेचरीसिद्धिभाग्भवेत्।
सकलार्थप्रदं ह्येतद्रहस्यं यन्त्रमुत्तमम् ॥ ३३१ ॥

## खेचरीसिद्धिदं यन्त्रम्

| | | | |
|---|---|---|---|
| १४ | ९ | ८ | ३ |
| ७ | ४ | १३ | १० |
| १ | ६ | ११ | १६ |
| १२ | १४ | २ | ५ |

इदं यन्त्रं समाख्यातं युग्मकार्यार्थसाधकम् ।
गोपनीयं सदा देवि ! नात्र कार्या विचारणा ॥ ३३२ ॥

इति खेचरीसिद्धिदं यन्त्रम् ।

चतुष्कोष्ठात्मकं यन्त्रं समष्टिफलदायकम् ।
तवाग्रे कथयिष्यामि महाकौतुककारकम् ॥ ३३३ ॥
कामधेन्वभिधं चैतत्कल्पवृक्षाभिधं त्विदम् ।
चिन्तामणि-समाख्यंच रोहिण्याख्यं ततः परम् ॥ ३३४ ॥
चतुःकोष्ठं तु विज्ञेयं मनोभिलषितप्रदम् ।
सप्तमे प्रथमे देवि ! भुवने- भानुसंमिते ॥ ३३५ ॥
नवमे च तिथौ वेदे रसे बाणे तृतीयके ।
षोडशे दशमे रुद्रे त्रयोदशमिते लिखेत् ॥ ३३६ ॥
द्वितीये चाष्टमे मन्त्री गुर्वनुज्ञा पुरःसरम् ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ ३३७ ॥
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ।
साध्यमत्र महेशानि ! मूलप्रकृतिसंभवा ॥ ३३८ ॥

**कामधेनुः**

| | | | |
|---|---|---|---|
| २ | १५ | १० | ७ |
| ९ | ८ | १ | १६ |
| ५ | १२ | १३ | ४ |
| १४ | ३ | ६ | ११ |

**कल्पद्रुमः**

| | | | |
|---|---|---|---|
| १४ | ५ | ९ | २ |
| ३ | १२ | ८ | १५ |
| ६ | १३ | १ | १० |
| ११ | ४ | १६ | ७ |

**चिन्तामणिः**

| | | | |
|---|---|---|---|
| ११ | ६ | ३ | १४ |
| ४ | १३ | १२ | ५ |
| १६ | १ | ८ | ९ |
| ७ | १० | १५ | २ |

**रोहिणीः**

| | | | |
|---|---|---|---|
| ७ | १६ | ४ | ११ |
| १० | १ | १३ | ६ |
| १५ | ८ | १२ | ३ |
| २ | ९ | ५ | १४ |

पूर्वोक्तैश्चाष्टगन्धैस्तु विलिख्य सुरसुन्दरि ! ।
धारयेद्दक्षिणे बाणौ वांछितार्थप्रदायकम् ॥ ३३९ ॥

इदं चतुःकोष्ठमयं मनोभिलषितप्रदम् ।
गोप्तव्यं सर्वथा भद्रे ! नास्तिकेभ्यः सदैव हि ॥ ३४० ॥

इति चतुःकोष्ठाभिधं यन्त्रम् ।

अमरौघवशं नाम यन्त्रराजं शृणु प्रिये ! ।
यन्त्रस्यास्य प्रभावेण देवाः सर्वे वशंवदाः ॥ ३४१ ॥
पक्षे नागे शिवे विश्वे स्वरे चैव सुरेश्वरि ।
पुनश्चन्द्रे मनौ भानौ नंदके साधकोत्तमः ॥ ३४२ ॥
तिथौ वेदे रसे पश्चात्षोडशे दशमे शरे ।
वह्नौ लिखेत्क्रमेणैव पूर्वपूर्वविभेदतः ॥ ३४३ ॥

देववश्यकरं यन्त्रम्

| | | | |
|---|---|---|---|
| ६ | १ | १६ | ११ |
| १५ | १२ | ५ | २ |
| ९ | १४ | ३ | ८ |
| ४ | ७ | १० | १३ |

प. देववश्यकरं यन्त्रम्

| | | | |
|---|---|---|---|
| ११ | १६ | १ | ६ |
| २ | ५ | १२ | १५ |
| ८ | ३ | १४ | ९ |
| १३ | १० | ७ | ४ |

साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ।
विलिखेद्देशिकः सम्यग्विलोमगतिना तथा ॥ ३४४ ॥
साध्यमत्र महेशानि ! कंटकीवश्यकारिणी ।
गंधाष्टकैः पूर्वमुक्तैर्विलिख्य धारयेत्सुधीः ।
अमरौघा वशं यान्ति सद्य एव न संशयः ॥ ३४५ ॥
इदं यन्त्रं समुद्दिष्टं देवौघवशकारकम् ।
गोपनीयं त्वया देवि ! पशुभ्यः सर्वथाद्भुतः ॥ ३४६ ॥

इति देववश्यकरं यन्त्रम् ५० ।

अधुना शृणु देवेशि ! यन्त्रराजं महाद्भुतम् ।
फलस्य कारकं ह्येतन्महाकालाभिधं शुभम् ॥ ३४७ ॥
महारौरवसंज्ञं तु कालघ्नं नरकापहम् ।
दशमे पञ्चमे वह्नौ पक्षे नागे शिवे पुनः ॥ ३४८ ॥
विश्वेस्वरे चन्द्रसंज्ञे मनौ भानौ नवात्मके ।
तिथौ वेदे रसे पश्चात्षोडशे विलिखेत्क्रमात् ॥ ३४९ ॥

नरकघ्नम्

| | | | |
|---|---|---|---|
| ९ | ४ | ३ | १४ |
| २ | १५ | ८ | ५ |
| १२ | १ | ६ | ११ |
| ७ | १० | १३ | १६ |

साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ।
विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ॥ ३५० ॥
साध्यमत्र विजानीयात्कमला रक्तवाहिनी ।
पूर्वोक्तैश्चाष्टगन्धैश्च विलिख्य सकलार्थदम् ॥ ३५१ ॥
धारयेत्कण्ठगं शश्वत्कालघ्नं नरकं हरेत् ।
विहरेत्पूर्णवर्षायुर्न विघ्नैरभिभूयते ।
महापातककर्त्तापि नरकं नैव पश्यति ॥ ३५२ ॥
इदं यन्त्रं मया किंचित्संकोचात्प्रकटीकृतम् ।
गोपितव्यं मम वचो साधुभ्योथ प्रदर्शयेत् ॥ ३५३ ॥

इति नरकघ्नं यन्त्रम् ।

अथातः शृणु देवेशि ! ब्रह्मास्त्रं यन्त्रनायकम् ।
यस्य विज्ञानमात्रेण यन्त्रसिद्धिर्हि जायते ॥ ३५४ ॥
नन्दे पञ्चदशे वेदे रसे चैव तु षोडशे ।
दशमे पञ्चमे वह्नौ पक्षे नागे शिवे पुनः ॥ ३५५ ॥

ब्रह्मास्त्रयन्त्रम्

| | | | |
|---|---|---|---|
| १४ | ९ | ८ | ३ |
| ७ | ४ | १३ | १० |
| १ | ६ | ११ | १६ |
| १२ | १५ | २ | ५ |

विश्वे स्वरे भूमिमिते मनौ भानौ यथाक्रमम् ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ ३५६ ॥

विलिखेत्पूर्वपूर्वाच्च विलोमविधिना शिवे ।
साध्यमत्र तु सावित्री गायत्री पृथिवीति च ॥ ३५७ ॥

पूर्वोक्तगन्धवृन्देन विलिख्य हृदि धारयेत् ।
सर्वं फलति देवेशि ! पूर्वोक्तं यन्त्रमुत्तमम् ॥ ३५८ ॥

इदं यन्त्रं वरारोहे ! तवाग्रे प्रकटीकृतम् ।
गोपनीयं त्वया भद्रे ! सत्यं सत्यं मयोदितम् ॥ ३५९ ॥

इति ब्रह्मास्त्रं यन्त्रं द्विपञ्चाशत्तमम् ।

अथोच्यते महेशानि ! यन्त्रराजो मनोहरः ।
नारसिंहं तथा यन्त्रं नारायणमथापरम् ॥ ३६० ॥

भवत्येव महादेवि ! यन्त्रैकं तु फलद्विभाक् ।
नारसिंहं भयहरं रक्षकं चापरं प्रिये ॥ ३६१ ॥

**नारसिंहं नारायणं च यन्त्रम्**

| | | | |
|---|---|---|---|
| ११ | १६ | १ | ६ |
| २ | ५ | १२ | १५ |
| ८ | ३ | १४ | ९ |
| १३ | १० | ७ | ४ |

नयने नागकोष्ठे तु शिवे विश्वमिते स्वरे ।
चन्द्रे मनौ रवौ नन्दे तिथौ वेदे रसे पुनः ॥ ३६२ ॥

विकारे दशमे बाणे वह्निकोष्ठे लिखेत्सुधीः ।
साध्यसाधकयोर्वर्णनिकीकृत्य दलीकृतान् ॥ ३६३ ॥

विलिखेत्पूर्वपूर्वाच्च विलोमेन सुरेश्वरि ।
साध्यमत्र महामाया देवी त्रिभुवनेश्वरी ॥ ३६४ ॥

पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य सुरसुन्दरि ।
धारयेत्कंठगं वापि बाहौ वा दक्षिणे प्रिये ॥ ३६५ ॥

धारणान्निर्भयो देवि ! जायते मानवः प्रिये ।
रक्षितो देवतावृन्दैर्जायते परमेश्वरि ॥ ३६६ ॥

एष ते यन्त्रराजस्तु मया सम्यगुदीरितः ।
गोपनीयोऽशुभेभ्यो हि देयः शिष्येभ्य एव च ॥ ३६७ ॥

इति नारसिंहं नारायणं च यन्त्रम् ५३ ॥

अथ वक्ष्ये रौद्रसंज्ञं चान्यद्घोरमपूर्वकम् ।
विधिवत्कथयिष्येहं फलद्वयसमन्वितम् ॥ ३६९ ॥

षोडशे दशमे बाणे वह्नौ नेत्रे वसौ शिवे ।
विश्वे स्वरे चन्द्रसंज्ञे मनौ भानौ तथांकके ॥ ३७० ॥

तिथौ वेदे रसे पश्चात्षोडशाद्विलिखेत्क्रमात् ।
साध्यसाधकयोर्वर्णानेकीकृत्य सुरेश्वरि ! ॥ ३७१ ॥

रौद्राघोरयन्त्रम्

| | | | |
|---|---|---|---|
| १० | ५ | ४ | १५ |
| ३ | १६ | ९ | ६ |
| १३ | २ | ७ | १२ |
| ८ | ११ | १४ | १ |

दलीकृत्य पूर्वपूर्वाद्विलोमविधिना शिवे ।
साध्यमत्र सुरेशानि देवी श्रीधूम्रलोचना ॥ ३७२ ॥

पूर्वोक्तैरेवद्रव्यैर्विलिख्य परिधारयेत् ।
कण्ठे वा वामबाहौ वा हृदये मूर्ध्नि धारयेत् ॥ ३७३ ॥

धारणाज्जायते सौख्यं रौद्रं ग्लानिविनाशनम् ।
अघोराज्जायते देवि निग्रहानुग्रहक्षमः ॥ ३७४ ॥

मया तु धार्यते देवि यन्त्रराजः सुरेश्वरि ! ॥ ३७५ ॥
इदं यन्त्रं मम हितं गोपनीयं तु सर्वदा ॥ ३७६ ॥

इति रौद्राघोरयन्त्रम् ५४ ।

अधुना शृणु देवेशि ! यन्त्रराजाभिधं परम् ।
न कस्यचिन्मया प्रोक्तं दृष्टं वापि न केनचित् ॥ ३७७ ॥
तदिदं तव सम्प्रीत्या प्रसन्नोस्मि तवानने ।
अस्मात्परतरं नास्ति मम प्रेम्णो विवर्द्धनम् ॥ ३७८ ॥
नंदे तिथौ तथा वेदे रसे च षोडशे पुनः ।
दशमे पञ्चमे वह्नौ नेत्रे चैव वसौ शिवे ॥ ३७९ ॥
विश्वे स्वरे भूमिमिते मनौ सूर्ये लिखेद्बुधः ।
साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ ३८० ॥

**शिवसाम्यप्रदं यन्त्रम्**

| | | | |
|---|---|---|---|
| १४ | ९ | ८ | ३ |
| ७ | ४ | १३ | १० |
| १ | ६ | ११ | १६ |
| १२ | १५ | २ | ५ |

विलिखेत्पूर्वपूर्वाच्च विलोमगतिना प्रिये ।
साध्यमत्र महेशानि भवानी भवतारिणी ॥ ३८१ ॥
पूर्वोदितैस्तथागंधैर्विलिख्य विधिना प्रिये ।
धारयेन्मस्तके भद्रे ! मम तुल्यो हि जायते ॥ ३८२ ॥
हर्ता कर्ता स्वयं पाता जायते मानवोत्तमः ॥ ३८३ ॥
इदं यन्त्रं यन्त्रराजाभिधं तुभ्यं प्रकाशितम् ।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ॥ ३८४ ॥

इति शिवसाम्यप्रदं यन्त्रम् ॥

इति श्रीशिवताण्डवे सर्वतन्त्रोत्तमेदक्षिणामूर्त्ति-पार्वती संवादे षोडशकोष्ठयन्त्रकथनं नाम

चतुर्दशः पटलः ॥

# तन्त्रामोद एवं शिवताण्डव

## भाषानुवादसहित शिवलहरीव्याख्यायुक्त:

## आचार्यचक्रपाणि कृत

डॉ. महाप्रभुलाल गोस्वामी के द्वारा प्रणीत तन्त्रामोद एवं शिवलहरी व्याख्यासहित शिवताण्डवतन्त्र विषय का अपूर्व ग्रन्थ है इसमे दार्शनिक दृष्टि से तन्त्र विषयों के विश्लेषण के साथ काल तत्त्व का विस्तृत विवरण है। महाकाल और काली का तन्त्र में विशिष्ट स्थान है। श्रीरामकृष्ण परमहंस जी आदि आधुनिक सिद्धगण इनकी आराधना से ही भोग और मोक्ष उभय की प्राप्ति की और लोक का उद्धार किया इस ग्रन्थ में इनका मूल आधार कालतत्त्व का दार्शनिक विश्लेषण दिया गया है। इस में शिवलहरीव्याख्यासहित शिवताण्डव का भी समावेश लौकिक एवं अलौकिक सभी कामनाओं की सिद्धि के साधन यन्त्रों का सन्निवेश कर अब तक अप्रकाश्य विषयों को देकर जिज्ञासुओं के लिए एक अपूर्व जानकारी के साथ यन्त्रों का भी प्रकार निरूपण किया है। इसके प्रयोग बहुत सहज हैं, अत: आज ही इसका संग्रहकर अपनी कामना की पूर्ति करें।

शिवलहरीव्याख्यासहित शिवताण्डव का हिन्दी अनुवाद के साथ प्रकाशन प्रथम बार हो रहा है। यन्त्रों के प्रति जिज्ञासु एवं कामनाओं की पूर्ति के साधन के लिए इधर-उधर भटकने वाले व्यक्तियों के लिए यह एक अपूर्व संग्राह्य ग्रन्थ है। इसके प्रयोग के द्वारा सभी कामनाओं की प्राप्ति अनायास की जा सकती है तथा आर्तजनों की पीडा का भी सहज में निवारण किया जा सकता है। इस अमूल्य अपूर्व ग्रन्थ का आज ही संग्रह करें। इसके प्रयोग सर्वथा अनुभूत और गोपनीय है।

(का. सं. ग्र. २३८)

---

शाखाएं :

**चौखम्भा संस्कृत भवन**
पोस्ट बाक्स नं० ११६०
चौक, (दि बनारस स्टेट बैंक बिल्डिंग)
वाराणसी-२२१ ००१ (भारत)

•

**चौखम्भा पब्लिकेशन्स**
४२६२/३ अंसारी रोड, दरियागंज
नई दिल्ली-११०००२

॥ श्रीः
का. सं.
२३८
तन्त्रामोद एवं शिवताण्डव
डॉ. महाप्रभुलाल गोस्वामी